केरळविश्वविद्यालयः

अनन्तशयनसंस्कृतग्रन्थावलिः

ग्रन्थाङ्कः — २१४

शृङ्गारसुन्दरभाणः

ईश्वरशर्मविरचितः

प्रकाशकः

डाक्टर्. के. राघवन् पिळ्ळ

पौरस्त्यग्रन्थप्रकाशनकार्यालयाध्यक्षः ।

अनन्तशयने एस्. वी. जी. मुद्रणालये मुद्रितम् ।

१९६५/११४०

मूल्यं रूप्यकद्वयम् ।

INTRODUCTION

The Bhāṇa is a type of dramatic composition consisting of only one Act and only one actor[1]. The theme is invariably erotico- humorous and in most cases the plot centres round a love- affair between some princely character and a courtezan. But poets do take advantage of the great flexibility that is allowed in the plot to introduce many side- stories and amorous descriptions. The only actor develops the plot through a series of questions and answers. As the Daśarūpaka says[2]:

भाणस्तु धूर्तचरितं स्वानुभूतं परेण वा ।
यत्रोपवर्णयेदेको निपुणः पण्डितो विटः ॥

सम्बोधनोक्तिप्रत्युक्ती कुर्यादाकाशभाषितैः ।
सूचयेद्वीरशृङ्गारौ शौर्यसौभाग्यसंस्तवैः ॥

---

1. *It is included among the ten dramatic compositions mentioned in Daśarūpaka.*

   नाटकं सप्रकरणं भाणः प्रहसनं डिमः ।
   व्यायोगसमवकारौ वीथ्यङ्केहामृगा इति ॥ (I, 8)

2. *Daśarūpaka, III, 49 - 50. The Sāhityadarpaṇa too gives a similar description. See. Pariccheda VI, Verses 227 - 230. For a study of the social position of the Bhāṇa and the South Indian origin of a large number of them see Introduction to Anaṅgajīvana Bhāṇa (T. S. S. 191).*

The Śṛṅgārasundarabhāṇa[3] which we are publishing as No. 214 of the T. S. S. conforms to every part of the above definition. The play opens with a Nāndi at the end of which the Sūtradhāra enters and proclaims that the Śṛṅgārasundarabhāṇa of Īśvara Śarma is to be performed. This brings the Prastāvana to an end.

Then enters a Viṭa named Abhirāma who after the usual description of the season says that his object for the day is to reunite the hetaera named Kesaramālikā with her lover Bhramaraka. Kesaramālikā had been forcefully abducted by Mahāvasu, son of minister Bṛhadvasu, and kept in his house. Meanwhile, Abhirāma had sent a hetaera-friend of his by name Hemamālikā to the house of Mahāvasu so as to divert the attention of Mahāvasu away from Kesaramālikā.

Abhirāma proceeds to the house of Mahāvasu where Kesaramālikā is kept interned. On the way he meets another hetaera named Mrgāṅkasenā who is also suffering from a similar predicament. Abhirāma promises to help her the next day. Also on the way he meets other hetaerae named Kuvalayamālikā, Mañjukeśī, Kāmasenā and so on in monotonous succession. All this is interspersed with descriptions of erotic poses.

---

3. *First published in the Journal of the Kerala University Oriental Manuscripts Library, Vol. XIII Nos. 2 & 3*

Finally Abhirāma reaches the house of Mahāvasu. There he arranges with Hemamālikā to pretend angry at living in the same house with Kesaramālikā. Accordingly Hemamālikā runs away from Mahāvasu when she finds him along with Kesaramālikā. Mahāvasu who was enamoured of Hemamālikā sets Abhirāma to pacify her. As Hemamālikā would not be satisfied with anything less Mahāvasu sets free Kesaramālikā. Abhirāma leads her to the house of Bhramaraka and then takes leave of the happy lovers.

As is evident from the summary of the story given above the whole episode is supposed to have taken place during one day - ie. from sunrise to sunset. This is again another characteristic that is usually found in most of the bhāṇas though not mentioned as such in any of the treatises on the subject, like Daśarūpaka.

Author: As is usual in most of the dramatic compositions in Sanskrit the author of the Śṛṅgārasundarabhāṇa too has given some details regarding himself in the beginning of the work. It is said that the author Īśvara Śarma was a resident of Bimbalī (Vaḍakkumkūr in the erstwhile state of Travancore). He was the disciple of a Nambūtiry belonging to Vyāghraveśma[3]. Most

3. *Page 2, verses 4 & 5. Vyāghraveśma could mean either that he belonged to Vaikom or that he belonged to a house in either of the two villages Puliyūr or Puliyannūr. Dr. Kunjunni Raja takes the view that perhaps he belonged lo Puliyanūr. See. The Contribution of Kerala to Sanskrit Literature, P. 223.*

probably Īśvara Śarma was also a nambūtiry.

We do not know anything definite about the date of Īśvara Śarma; nor do we know anything further about his life. However, since the author does not mention any king of Bimbalī we may conjecture that he might have lived after the annexation of that state by king Mārttāṇḍavarma of Travancore about 1750 A. D. There is a reference to Gośrī, possibly to Cochin, the capital of the kings of Cochin, whose great affluence the author praises. This would show that he was quite familiar with that place. Quite possibly he was patronised by a king of Cochin to whom he refers as the King of Kerala. (केरलाधीश्वर–P. 42.)

Īśvara Śarma is a poet of some merit though we are yet to discover any other work of his. He is endowed with a style which is at the same time simple and expressive. It is again eminently suited to deal with the erotico-humorous theme of the Bhāṇa. As illustration may be noted the following verse:

स्त्रीपुंसानां त्रिजगति कठोराणि चित्तानि भेत्तुं
भूयो भूयः कुसुमविशिखानिक्षुधन्वा विमुञ्चन् ।
भग्ने भग्ने धनुषि सपदि प्रग्रहीतुं ततोऽन्यद्
गौणीकूले किल विचरति स्फीतनीलेक्षुजाले ॥

(P. 12, verse 41)

And the following frankly erotic description of a hetaera:

प्रत्यग्राम्बुदकान्तकुन्तळभरा त्रस्तैणशावेक्षणा
बन्धूकप्रसवोज्ज्वलाधरपुटा कुम्भाभिरामस्तनी ।
दिग्दन्तावळशीर्षपीनजघना रक्ताब्जराजत्पदा
कस्मालं वितनोति नो नयनयोरानन्दनं मानिनी ॥

(P. 22, V. 68)

Īśvara Śarma shows also a fine dramatic sense. At times he introduces a dramatic touch which gives additional poignancy to the situation. For instance Bhramaraka who is suffering from the separation of his sweet-heart starts to recite a verse but falls into a swoon before it could be completed.

अयि जीवादपि श्रेष्ठ भद्रे केसरमालिके ।
कदाहं त्वाम् ... ... ॥

इति । किं ब्रवीषि । कुतो वाक्यशेषस्य उक्तौ विलम्बते इति । (सम्यगालोक्य) कष्टम् मूर्च्छितोऽयं तपस्वी ॥ (P. 52.)

And as is usual in most of the bhāṇas there is also the description of a haggard old prostitute.

पलितश्वेतकेशौघा वलीविश्लथविग्रहा ।
शुष्कस्तनी जरा साक्षान्मूर्तेवाप्रियदर्शना ॥

(P. 26, V. 81)

The edition is based on the following manuscripts of this Library. (1) No. P. L. 1596 — क.

(2) No. P. L. 1597 — ख.

The two manuscripts are similar to each other to a certain extent and both exhibit certain common characteristics. For iustance the brief lacunae that occur on pages 29, 35 and 50 are seen in both the manuscripts. Moreever, some portion is seen to be missing in both the manuscripts towards the end of the work. There is neither any bharatavākya nor any colophon in any of the manuscripts to indicate the conclusion of the work. So much so the work remains incomplete, though only a small portion seems to be missing.

I have been assisted in the publication of this work by Sri. A. Ramachandra Sastri, Research Officer, and Sri. M. Madhavan Unni and Sri. C. P. M. Nambootiry, Assistant Research Officers.

Trivandrum
27 - 10 - 1964

K. Raghavan Pillai.
CURATOR.

॥ श्री ॥

शृङ्गारसुन्दरभाणः

ईश्वरशर्मविरचितः ।

इन्दुकलां हर्तुं पितुरुन्नमितो नालिकेरखण्डधिया ।
कुण्डलितः सर्पगणाद् भिया करो बालगणपतेर्वोऽव्यात् ॥ १ ॥

(नान्द्यन्ते प्रविश्य सूत्रधारः)

सूत्रधारः—

श्रीमन् नन्दसुताधुना मम करादुत्पत्य सद्यो गतः
कालिन्दीतटकेलिवञ्जुलवनोद्देशाय लीलाशुकः ।
आवामेव तमाविशाव निभृतं तन्मार्गणार्थं जवा-
दित्थं गोपिकयोदितः सह तया गच्छन् हरिः पातु वः ॥

अपिच—

मृगाक्षीणामङ्गं मृदुविचलवाचालरशनं
परं यस्य क्षेत्रं परमसुखदं सेवनकृताम् ।
प्रभावाद् यस्येह प्रचयमयते वारिजभुवो
विना यत्नं सृष्टिर्वितरतु मुदं वः स मदनः ॥ २ ॥

अलं[1] विलम्बेन । पूर्वमेवाहूतापि कुतो नागच्छति मे कुटुम्बिनी मयूरिका ।
(इति पार्श्वत आलोक्य)एषा सा समीपमागतैव । आचक्षे तावदेतदेनाम् ।

---

१. 'लं प्रपञ्चेन' ख.

(आकाशे) आर्ये ! आदिष्टोऽस्म्यहमद्यार्यमिश्रैः । यथा—

ग्याप्रवेशमनिवासस्य द्विजराजशिरोमणेः ।
सद्गुरोर्यः कृपालेशात् साध्वीं शक्तिमवाप्तवान् ॥ ४ ॥
[1]बिम्बलीवासिनस्तस्य कृतिरीश्वरशर्मणः ।
भवता नाटनीयोऽद्य भाणः शृङ्गारसुन्दरः ॥ ५ ॥

इति । किं ब्रवीषि । आर्य ! चिरादद्य यथाभिलषितमेवार्यमिश्राणामनुग्रहो नः सम्भूतः । किन्त्वहं तद्रूपकं निपुणाभिनयमनोज्ञं नाट्यमानमार्येण सह प्रेक्षितुमिच्छामीति । अहमपि तथैवेच्छामि । एतत्तु महतीं प्रीतिमावहेदिति मन्ये । यतः—

प्रेक्षारसपूर्तिमतो नाट्यस्य रसायनस्य(प्री?पी)तिश्च ।
अभिमतजनेन सहितं क्रियमाणे प्रीतिमतितरां कुरुतः ॥ ६ ॥

किं ब्रवीषि । तेन तावद् बिम्बलीभूभागादागतः कविसुहृन्मम मातृष्वसेयो नीलकण्ठो नाम नटवरस्तं नाटयत्विति । एवमेव । मया स एष तदर्थमार्यमिश्राणामनुमत्या नियुक्तो गृहीतभूमिकश्च वर्तते । त्वं तावदिमं मधुमासमधिकृत्य गातुमर्हसि । किं ब्रवीषि । यदनुशास्त्यार्यः इति । (कर्णं दत्त्वा) किं गायसि,

मधुरौज्ज्वल्यसमेतः सुमनःपल्लवकपुष्कलश्रीमान् ।
विलसत्ययमभिरामः सरसं घटयन्नयोगिनो यूनः ॥ ७ ॥

इति । साधु गीतम् । गच्छावस्तावत् प्रेक्षकपदम् । (इति परिक्रम्य निष्क्रान्तः ।)

प्रस्तावना ।

---

१. 'विम्बली' ख.

(ततः कौसुम्भाम्बरोष्णीषधरः सुवर्णलेपकान्तकुन्तालंकृतपाणिरभिरामो नाम विटः प्रविश्य आत्मानमवलोक्य च)

विटः—

ईदृक्सौभाग्यरम्योऽहं पेशलैरिह कौशलैः ।
तत्तादृशानभीष्टार्थान् साधयामि श्रमं विना ॥ ८ ॥

(पूर्वां दिशमवलोक्य)

अर्कोऽसावतिरक्ताभो मस्तके पूर्वभूभृतः ।
पद्मरागमयो मौलिरिव विद्योततेऽधिकम् ॥ ९ ॥

सम्प्रति हि,

बालातपोऽतितुङ्गानां नगानां मूर्धसु स्फुटम् ।
कौसुम्भशाटिकोष्णीष इव विभ्राजते भृशम् ॥ १० ॥

अपिच,

अन्धकारकुलान्यर्ककराक्रान्तिविशङ्कया ।
सद्यो विशन्ति संशान्तदीपं वासगृहोदरम् ॥ ११ ॥

किञ्च,

मुग्धा वध्वो वेश्मकर्मण्यवश्यं कार्ये स्वाङ्गे भोगलक्ष्मोज्ज्वले च ।
कामं स्थातुं यातुमप्यप्रवीणाः शय्यागेहे केवलं व्यावलन्ते ॥ १२ ॥

(मनःप्रसादमभिनीय)

अधुनेष्टार्थसिद्ध्यर्थमारब्धव्यं मनस्विना ।
स्वोदयेन सहारब्धं सूर्यो हि परिपूरयेत् ॥ १३ ॥

(स्मरणमभिनीय) अस्मिन्नहनि कः पुनरभीष्टोऽर्थो मे साधयितव्योऽस्ति ।

आ! स्मृतम् । महाराजामात्यस्य बृहद्वसोः पुत्रेण महावसुना मदनविवशेन बलादानीय स्वमन्दिरे निरुद्धाया नारीजातिमणेः केसरमालिकाया नरलोकरत्नेन भ्रमरकेण संयोजनमन्योन्यानुरागसादृश्यदर्शनसन्तुष्टेन मया प्रतिज्ञातमसाधितं कष्टमृणमिव वर्तते । तदेवाद्य साधयितव्यम् । यतः,

मिथो नितान्तमौत्सुक्याद्विप्रलम्भाच्च सीदतोः ।
यूनोः संयोजनं स्वार्थादप्यभीष्टतमं मम ॥ १४ ॥

तत्तु प्रतिज्ञानन्तरं मया केसरमालिकायां महावसोर्विरागं कारयितुं वत्सां हेममालिकां प्रेषयता प्रारब्धम् । साम्प्रतं पुनरन्वारब्धव्यम् । (स्मृतिमभिनीय) अथ कथं महावसुमन्दिरं गतायास्तस्या वत्सायाः प्रवृत्तिं जानीयाम् । आ! स्मृतम् । ह्यः सायाह्ने तस्याः प्रियसखी मल्लिकासेना महावसुमन्दिरादिह स्वगृहमागतेति भद्रकेतुमुखान्मया श्रुतम् । तां तावत्तदर्थं गच्छामि (इति किञ्चिद् गत्वा पार्श्वत आलोक्य च)

एषा सा मल्लिकासेना मम सन्निधिमागता ।
स्यात् साध्यस्य सुसिद्ध्यै हि गम्यस्य स्वयमागमः ॥ १५ ॥

एषा नमो भावायेति मह्यमुपचाराञ्जलिं बध्नाति । आशीर्वादेनाभिनन्दाम्येनाम् । (आकाशे) भद्रे मल्लिकासेने! भद्रं ते भूयात् । किं ब्रवीषि । अनुगृहीतास्मि भावेनेति । अपि कुशलं ते । किं ब्रवीषि । कुशलमेवेति । ननु जानासि त्वं वत्साया हेममालिकायाः साम्प्रतन्तनीं प्रवृत्तिम् । किं ब्रवीषि । जानामीति । कथय कथमिव । किं ब्रवीषि ।

---

१. 'काया महा' ख.

सा महावसुं वशे कृत्वा तेन साकं तन्मन्दिरे सततं रमत इति । का वार्ता पुनरिदानीं केसरमालिकायाः । किं ब्रवीषि । तां यथावद् वक्तुं नाहं शक्नोमि । तथाप्येतावतीं ब्रवीमि । साम्प्रतं सा तपस्विनी,

अमरक इति नामन्यन्यसङ्केतितेऽपि
श्रुतिपथमुपयाते तां दिशं वीक्षमाणा ।
अविरतपरिपातामुत्सृजन्त्यश्रुधारां
जनयति जलमुच्चैः पश्यतां चेक्षणेषु ॥ १६ ॥

अपिच,

आळीमुखेषु स्मितलेशदर्शने ज्योत्स्नाप्रकाशस्मरणात् प्रवेपते ।
किञ्चाश्नुते गीतिषु पञ्चमस्वरश्रुत्यां विमोहं पिकनिस्वनस्मृतेः ॥१७॥

इति । हेममालिकायां वर्धमानरागो महावसुस्तस्यां किमुदासीनः सम्भूतः । किं ब्रवीषि । उदासीनः सम्भूतः । तथापि तां न जहातीति । तत् पुनः सुसाधमेव । किं ब्रवीषि । एषा प्रियसख्याः कापि सन्देशपत्रिका मया समानीता । गृह्यतामेषा भावेनेति । एवम् । (इति पत्रिकाग्रहणं नाटयित्वा [1]विलोक्य च स्वगतं) कथं लिखितम् । महावसुमन्दिरस्था हेममालिका प्रणम्यार्यपादान् विज्ञापयति,

आर्यपादैर्यदादिष्टमखिलं तत् कृतं मया ।
अतः परं तु यत् कार्यं तन्मे सन्दिश्यतां द्रुतम् ॥ १८ ॥

इति । दिष्ट्या क्लेशेन विना सिद्धा वत्सायाः क्रिया । (आकाशे) किं ब्रवीषि । भाव, कथ्यतां तस्यां केसरमालिकायां कीदृशो भावाविर्भावस्तस्य अमरकस्येति । कलभाषिणि, किं बहुभाषणेन । साम्प्रतं स तपस्वी तस्यामौत्सुक्यात्,

---

१. 'आलोक्य' ख.

निजप्रभामात्रविभूषणेन गात्रेण मारास्त्रतनूकृतेन ।
अज्ञातकृत्याकुलमित्रभृत्यो मुहुर्मुहुः कश्मलमश्नुतेऽलम् ॥१९॥

किं ब्रवीषि । तामचिरात् तेन संयोजयितुमर्हति तावद् भाव इति । तदर्थमेवाहं प्रयते । किं ब्रवीषि । अचिरेण पुनर्दर्शनमस्तु । गच्छाम्यहं गृहकृत्यपरतन्त्रेति । (पार्श्वत आलोक्य स्वगतं) कथमियं प्रतिसन्देशमगृहीत्वा गच्छति । प्रतिषेधाम्येनाम् । अथवेयं गच्छतु । अहमेव तावत् तमर्थं साधयितुं महावसुमन्दिराय तूर्णं गच्छामि । (इति किञ्चिद्गत्वा पुरस्तादालोक्य च)

दिष्ट्या प्रदक्षिणं यान्ति ममैते मङ्गलाः खगाः ।
सुनिमित्तानि साध्यस्य सुसाधत्वं वदन्ति हि ॥ २० ॥

सत्वरं साधयामि तावत् । (इति परिक्रम्य परित आलोक्य च) अहो अतिरमणीयलक्ष्मीविलासोत्तरेयं गोश्रीर्नाम केरळराजानां राजधानी ।

अस्यां हि,

शोभन्ते मणिदीपदीप्त्यविरतप्रद्योतगर्भा गृहाः
प्रासादा अपि तारकाकुलकलाखेलाक्षमाग्रस्थलाः ।
शश्वद्ध्वान्तनिरन्तरोदरलतागेहास्तथा निष्कुटाः
कासाराश्च सुवर्णवारिजवनीरुक्सङ्गपिङ्गाम्भसः ॥ २१

अपिच,

समुत्पन्ना स्वस्मात् सकलजनतासम्मदकरी
सदा सा श्रीरस्यां कलयति निवासं स्थिरतया ।
इति प्रेम्णा नूनं निखिलगुणसम्पज्जनिभुवः
परित्राणायास्या वहति परिखात्वं जलनिधिः ॥ २२ ॥

किञ्च,

इन्दुर्द्युमार्गगमनश्रमनुत्तयेऽस्यां
सद्योविकीर्णघनलेपनशीतलासु ।
सौधाग्रभूमिषु पुनःपुनरासनेन
सङ्क्रान्तयार्द्रसुधया किल पाण्डरोऽभूत् ॥२३॥

अहो बतेयममर्त्यराजधानीष्वन्यत(रे?मे)व प्रतिभाति ।

स्वर्गात् किन्न्वमरावतीह पतिता किं भोगवत्युद्गता
पाताळादथवा त्रिकूटकटकाल्लङ्का किमभ्यागता ।
आयाता किमुताळका हरगिरेः किं भूरिभिर्वर्णनै-
राम्योऽन्यात्र जगत्रये न नगरी भूतिं बिभर्तीदृशीम् ॥२४॥

ही ! वर्षशतेनाप्यस्यामाश्चर्याणि न साकल्येन दृश्येरन् । तत्पथि दृश्यानि परं पश्यन् गच्छामि । (इति परिक्रम्यालोक्य च) अये कनकाकरो नामात्यर्थसमृद्धिमानापणः । अस्मिन् हि,

वीथीषु विच्युताकीर्णान् व्रीहिनिव बहून्मणीन् ।
उपाददान उञ्छार्जी जनो वित्तेश्वरायते ॥ २५ ॥

अत्र सञ्चाराय नाद्यावसरः । तूर्णमितो गच्छाम्येव । (इति परिक्रम्यालोक्य च) अये एष शृङ्गारभद्रो नाम रमणीयो वेशवाटः । एतस्मिन् हि,

मनो जनानां मधुराभिरामैर्गुणैर्हरन्त्यो गणिका निकामम् ।
विभान्ति साक्षाद् रतिवल्लभस्य शृङ्गारलीला इव मूर्तिमत्यः ॥२६॥

अत्र तावदनया मध्यमया वीथ्या गच्छामि । (इति परिक्रम्य पुरस्तादालोक्य च)अये एतद् गणिकाकुलमौलिमालिकायाः कुवलयमालिकाया भवनम् । अत्र प्रवेष्टुं मे नायं समयः । सत्वरमनेन चत्वरान्तवर्त्मना

गच्छामि । (इति किञ्चिद् गत्वा पार्श्वत आलोक्य च) एषा कुवलय-मालिका,

नखदशनपदाळ्यां दत्तदृष्ट्या सहाळ्या
किमपि किम(पि मन्दं) सस्मितास्या वदन्ती ।
निखिलनृकुलचेतोहारिणा कान्तिभूम्ना
सतनुरिव रतिश्रीस्तिष्ठति द्वारदेशे ॥२७॥

नैषा साम्प्रतमुपसरणीया । त्वरितमितो गच्छामि । (इति किञ्चिद् गत्वा पश्चादालोक्य च) एषा कुवलयमालिका मां दृष्ट्वा तूर्णमनुपदमेवागता अभिमुखीभूय स्थित्वा कुशलप्रश्नादिकं करोति । (इत्यन्यतोमुखः स्थित्वा आकाशे) सखि कुवलयमालिके ! अपि कुशलं ते । किं ब्रवीषि । अलमत्र भावो मां कुशलं पृष्ट्वा । कस्मान्मे सन्निधिं परिहृत्य सत्वरं गतवानिति । शृणु तावत्,

उभयोर्गूढमन्योन्यं वदतोर्यो नरोऽन्तिकम् ।
विना कारणमभ्येति तं द्विपादं विदुः पशुम् ॥२८॥

इति वृद्धानां प्रवादस्य हेतोरहमेवं गतवानस्मि । त्वं पुनर्ह्यो मध्याह्ने स्वगेहं गत्वा कृत्यानि कृत्वा द्यूतक्रीडार्थं द्रुतं मम सकाशमागमिष्या-मीत्युक्त्वा गता कस्माद् भूयो नागच्छः । किं ब्रवीषि । ह्यो मम भोजनानन्तरमेव महत्तरो ज्वरोऽकस्मादागतः । तेनाहमज्ञातयात-दिनरजनि स्वगृहे शयितवती । ततो नागच्छामिति । ही गगनकुसुमेन प्रसाधयितुम् आरभसे । किं ब्रवीषि । कुतोऽयमुपन्यास इति । यतो-ऽङ्गेषु ते ज्वरागमलक्षणं न लक्ष्यते । प्रत्युत सम्भोगलक्ष्मविलसितानि सम्भवन्ति । तथाहि,

आरुण्यं जनयत्ययं तव दृशोस्ताम्बूलरागो भृशं
शोणत्वं दशनच्छदे द्विगुणयन्त्येतेऽपि दन्तव्रणाः ।
तन्वच्छांशुकशालिनोर्नखपदश्रीश्चेयमूर्वोः स्फुटं
श्वेताब्दान्तरदृश्यमानशशभृल्लेखाद्युतिं पुष्यति ॥२९॥

किं ब्रवीषि । एवमेवैतत् । किन्तु—

स्त्रीणामीदृश्यवस्थायामाचारो व्याजभाषणम् ।
इज्यायां ब्रह्मजातीनां पशुसंज्ञपनं यथा ॥३०॥

इति । नास्त्येवं कोऽपि विधिः । तत्कथ्यतां तथ्यमेव । किं ब्रवीषि । श्रूयतां तावत् । ह्यो मम भोजनानन्तरमेव गृहमागतः शैशवप्रभृति विहितपांसुलीलादिचिरपरिचयप्रवृद्धप्रणयो वज्राङ्गपुत्रो हेमाङ्ग इति । ततस्ततः । किं ब्रवीषि ।

मूर्तेनेव मनोजेन तेन साकं कलाक्रमैः ।
स्वैरं मे तत्र खेलन्त्याः प्रदोषो द्रुतमागतः ॥३१॥

इति । ततस्ततः । किं ब्रवीषि । ततोऽहं तत्कालोचितानि गृहकृत्यानि सर्वाणि सत्वरं कृत्वा—

शय्यानिकेतनं तेन सविलासमधिष्ठितम् ।
काञ्चनाब्जान्वितं कामपूजागृहमिवाविशम् ॥३२॥

इति । ततस्ततः । किं ब्रवीषि । ततः परं पुनरेतावद्वक्तुं जानामि,

सेयं निशीथिनी तत्र तेन साकं कलाविदा ।
रागेण वर्तमानाया नाडिकेव गता द्रुतम् ॥३३॥

इति । उपपद्यते हि सम्यगेवैतत् । किं ब्रवीषि । अलंकर्तुमर्हति भावो मे भवनमिति । महतः कार्यस्य कृते द्रुतं गच्छन्नहं तत्र निवासं न साम्प्रतमासादयामि । तत्तूर्णं प्रतिगच्छ त्वम् । किं ब्रवीषि । यथा वदति भाव इति । (स्वगतम्) प्रतिगतेयम् । इतोऽहं गच्छामि । (इति परिक्रम्यावलोक्य च) अये! इदं मृगाङ्कसेनाया भवनम् । (कर्णं दत्त्वा) कथमस्मिन्नबलाविलाप इव श्रूयते । अत्र प्रविश्यास्य कारणमवगच्छामि । (इति प्रवेशं नाटयित्वालोक्य च) अयं कपोतको ममालोकनाद्भीतो[1] द्रुतं पलायते । इयं पुनर्मृगाङ्कसेना ममालोके[2] नाभिनन्दति । किं च,

रत्नादर्शनिभे कपोलफलके मन्दं गलित्वा ततो
निष्पत्याद्रिघने द्रुतं कुचतटे नानाविधं निस्सरत् ।
आस्रं कज्जलशालि पूगकुहलीकान्ते तु नीवीमुखे
पातात् प्राक् तनुपाटलैः कररुहैः क्षिप्रं क्षिपत्यन्यतः ॥३४॥

उपसराम्येनाम् । (इति किंचिद्गत्वा) एषा नमो भावायेति मह्यमञ्जलिं बध्नाति । आशीर्वादं तावत् प्रयुञ्जे (आकाशे) कल्याणि! कल्याणं ते भूयात् । किं ब्रवीषि । अनुगृहतास्मि भावेनेति । अपि कुशलं ते । किं ब्रवीषि । कुतो मे वराक्याः कुशलमिति । विलापेनालम् । ब्रूहि किं तादृशं तवापकृतवान् स कपोतकः । किं ब्रवीषि । कचेषु प्रगृह्य मां कशाकर्कशेन करेण बहुकृत्वस्ताडितवानिति । सुशीले! तस्याः क्रियायाः किं कारणं भवति । किं ब्रवीषि । श्रूयताम् । अयं कपोतको मम वल्लभमाबाल्यसञ्जातप्रणयं सोमकेतुं धनदानेन वशीकृतानां स्वजनानां शासनेन निस्सार्य तत्पदमधिगतवानिति । एतन्मया पूर्वमेव श्रुतम् । ही धिक् ।

---

१. 'नाम्यान्वितं' ख. २. 'लोकने नाभि' ख.

परस्मिन् निर्भरं रक्तां स्वे विरक्तां च योषितम् ।
यो नरो याति निर्बन्धात् स द्विपाद् गर्दभो ध्रुवम् ॥३५॥

ततस्ततः । किं ब्रवीषि । ततो वियोगविह्वलतया युगेष्विव कतिपयेषु मासेषु यातेषु अद्य अर्थान्तरान्वेषणमिषेणात्रागतमारादुपेत्याहमालोकितवतीत्येतावदेवेह कारणमिति । धिक् कष्टमेतदापतितम् ।

इष्टस्य पुंसो विगमस्तथानिष्टस्य सङ्गमः ।
इदं द्वयं मृगाक्षीणामिहैव नरको महान् ॥३६॥

किं ब्रवीषि । हा हन्त,

ईदृश्यामप्यवस्थायां जीवाम्येव करोमि किम् ।
आर्त्यै नूनमभाग्यानामायुर्द्राघयतीश्वरः ॥३७॥

इति । पल्लवाङ्गि ! परितापेनालम् । यथा स सोमकेतुर्यथापूर्वमेवात्र समागच्छेत् कपोतको नागच्छेच्च तथा कर्तास्म्यहम् । किं ब्रवीषि । अनुकम्पितास्मि भावेनेति । किन्तु कस्यापि महतोऽर्थस्यावश्यसाध्यत्वादद्याहमत्र न विलम्बितुं क्षमोऽस्मि । तेन श्वो वा तद् भविता । किं ब्रवीषि । यथा मन्यते भावः इति । एषोऽहं तावद् गच्छामि । (इति परिक्रम्यावलोक्य च) अये एतद् गणिकाकुलपताकायाः सङ्गीतपताकाया निकेतनम् । (कर्णं दत्त्वा) कथमत्र श्रूयते,

गौणीवातोच्चलितपरिधानान्तदृश्योरुदण्डा
शय्याश्लेषव्यतिकरविगाढैकवक्षोजकुम्भा ।
अङ्के सख्याः प्रसृतचिकुरं न्यस्तशीर्षा शयाना
या दृष्टा सा दिशि दिशि सदा दृश्यते चारुगात्री ॥३८॥

इति । अये सङ्गीतपताकादेशिकस्य सुगीतेर्द्रामिळस्यैतत् प्रलपितम् ।

अत्र प्रविश्यास्य चेतोज्वरस्य हेतुमवगच्छामि । (इति प्रवेशं नाटयित्वा-लोक्य च) एष सुगीतिः सख्युरनुगीतेरुत्सङ्गे मूर्धानमुपधाय कदळी-किसलयमये शयनीये शेते । उपसराम्येनम् । (इति किंचिद् गत्वा) एष ममालोकनात् सत्वरमुत्थाय शयनीय एवेतोऽभिमुखो निषण्णः सम्भा-षितुमारभते। (आकाशे) किं ब्रवीषि । सखे चकोरक! स्वागतं भवते । अपि कुशलमिति । कुशलमेव । किं ब्रवीषि । ही धिङ् मे प्रमादं, येन मया भवतो देवदत्तां तामभिराम इत्यभिख्यां विस्मृत्य प्राकृतनी गृहीतेति । आस्तामेतत् । कथ्यतां कीदृशस्तवैतस्य चेतोज्वरस्य हेतुः । किं ब्रवीषि । श्रूयतां, कदाचिदहं बिम्बलीदेशे सञ्चरन् यदृच्छया गौणीतरङ्गिण्याः कूले कुत्रापि मन्दिरे,

राज्यलक्ष्मीं रतीशस्य साक्षान्मूर्तिमतीमिव ।
असामान्यगुणोदारामपश्यं काञ्चिदङ्गनाम् ॥३९॥

इति । ततस्ततः । किं ब्रवीषि । ततोऽहं तस्या हेतोः,

अन्तस्तदादि सहसा मुहुरुद्यतोच्चै-
रुच्चावचोष्मगुरुणा मदनज्वरेण ।
आविश्य कोटरमनु ज्वलता नितान्तं
दावानलेन वनवृक्ष इवास्मि तान्तः ॥४०॥

इति । तत्र सञ्चरितवतामीदृशदशोपलम्भः सम्भवत्येव । यतः,

स्त्रीपुंसानां त्रिजगति कठोराणि चित्तानि भेत्तुं
भूयो भूयः कुसुमविशिखानिक्षुधन्वा विमुञ्चन् ।
भग्ने भग्ने धनुषि सपदि ग्रहीतुं ततोऽन्यद्
गौणीकूले किल विचरति स्फीतनीलेक्षुजाले ॥४१॥

ततस्ततः । किं ब्रवीषि । ततोऽहं तस्याः प्राप्तये विहितविविधोपायो-(ह्यसिध्य) सिद्धार्थ एव तस्माद् देशाद् यथाकथञ्चिदत्रागतो दिष्ट्याद्य सर्वार्थसाधनसमर्थं भवन्तमुपलब्धवानस्मीति । सखे ! सोऽर्थो दूरगतत्वादिना दुःसाध इव प्रतिभाति । तथाप्यहं ते तत्सिद्ध्यर्थमुपायान् कल्पयिष्यामि । किन्त्वेषु त्रिचतुरेषु वासरेष्ववसरं न लप्स्ये । किं ब्रवीषि । यथा मन्यते भवानिति । गच्छामि तावदहम् । (इति परिक्रम्य पुरस्तादालोक्य च स्वगतम्) मनोरमेयं कापि शारिका अस्य मार्गद्रुमस्य फलभारावनतां स्कन्धशाखामध्यास्ते । (कर्णं दत्त्वा) कथमियमालपति— अङ्ग सुरूप ! स्वागतं ते कुतस्त्वमिदानीं स्वगृहाद्, अपि कुशलं ते, कुशलम् इति क्वचिन्मिश्रमितः कयोश्चिदुपचारप्रश्नोत्तरक्रमोऽप्यनेनयोच्यते । कथं पुनरपि कथयति ।

किमत्रान्तः कान्तस्तव नहि गतो राजभवनं
क्व सा वृद्धा माता सहजनिलये मे निवसति ।
क्व वा चेटीवर्गो वनमगमदेधोहृतिकृते
कथं तावच्छून्यं भवनमिदमेकाधिवससि ॥४२॥

इति कयोश्चिद् योषित्पुरुषयोरुपांशुसल्लापोऽप्यनेनया कथ्यते । मन्दमुपेत्य गृह्यामेनां गृह्णामि (इति किंचिद् गत्वा शारिकाग्रहणं नाटयित्वा) पञ्जरं विना कथम् एनां बिभर्मि । (इति पुरस्तादालोक्य) अये शारिकापञ्जरं वहन् अयं मे प्रियसखो वीरसेनः,

मुक्तकेशः परिस्रस्तप्रावारः प्रक्षरत्तनुः ।
आधावति स्खलत्पादः सम्भ्रमो मूर्तिमानिव ॥४३॥

नूनमयमेनामन्विच्छति । एष द्रुतमासन्नः सम्भूतः । एवं तावदेनमाभाषे । (आकाशे) अङ्ग ! वीरसेन ! किमर्थं त्वमेवं ससम्भ्रमो धावसि ।

किं ब्रवीषि । मम प्रमादेन साम्प्रतं कापि शारिका पञ्जरान्निर्गत्य प्रडीनाभूत् । तस्या आसादनार्थमिति । अलं सम्भ्रमेण । एषा सा शारिका । (इति शारिकादर्शनं नाटयित्वा) किं ब्रवीषि । अयि प्रियसख ! महदेतन्मे भवतोपकृतमेतस्याः शारिकाया दानेन । प्रस्तुतार्थपरतन्त्रं मां प्रस्थापयितुमर्हति भवानिति । यस्यामेषा प्रडीनाभूत् तां ते प्रमाददशां श्रुत्वा पश्चादेनां ददानि । किं ब्रवीषि । श्रूयतां तावत् । द्वीपान्तरादानीतैषा शारिका देव्या चन्द्रप्रभया नानाभाषाशिक्षणार्थं मम करे समर्पिता । मया पुनर्गृहं नीत्वा महाराष्ट्रमगधशूरसेनादिभाषाः सम्यक् शिक्षिताश्चेति । ततस्ततः । किं ब्रवीषि । ततोऽद्याहं तामेनां तस्यै प्रत्यर्पयितुं पञ्जरस्थामादायागच्छन् पथि यदृच्छया वनिताकुलपताकायाः कल्पलतिकाया निकेतनमासादितवानिति । ततस्तत किं ब्रवीषि । ततः सा तदानीमेकस्मादपवरकात्,

मदमन्थरसिन्धुरेन्द्रगत्या दरविश्लिष्टकुचोत्तरीयबन्धा ।
वपुषा सहितेव पुष्पहेतेर्भुजविक्रान्तिरवापदन्तिकं मे ॥४४॥

इति । ततस्ततः । किं ब्रवीषि । ततः सा स्वागतादिव्याहरपूर्वं मृगलोममयं वरासनं हूणीगण्डपाण्डूनि ताम्बूलीदलानि[1] गन्धद्रव्यक्काथसिद्धानि बालपूगफलानि कर्पूरसम्पर्कसुरभिलं सुधाक्षारं चासन्नप्रतिष्ठिताया निर्यूहपेटिकाया[2] आदाय सादरं मह्यमुपहृतवतीति । ततस्ततः । किं ब्रवीषि । ततोऽहमन्तर्निविष्टशारिकमेतत् पञ्जरमन्तिक एव विन्यस्य तत्रोपविष्टः ।

ताम्बूलयोगं तं चर्वन् सञ्जल्पंश्च तया सह ।
वदने हृदि चामोदं रागेण समसूढवान् ॥४५॥

इति । ततस्ततः । किं ब्रवीषि । ततोऽहं तस्याः,

---

१. ' ताम्बूलदलानि ' ख.   २. ' वेदिकायाः ' ख.

प्रकटितपृथुलौल्यं दृग्युगं स्फीतराग-
स्फुरितमधरमुद्यत्कान्ति वक्षोजयुग्मम् ।
सुरुचि जघनचक्रं प्रेक्षिपि क्रीडयातो
द्रुतमपवरके सा सस्मितास्या निलीना ॥४६॥

इति ततस्ततः । किं ब्रवीषि । ततोऽहं सद्यस्तस्या गुणैराबध्याकृष्यमाण इवानुपदमेव तदपवरकं प्रविष्टो नितम्बबिम्बेन पर्यङ्कपार्श्वभागमवलम्ब्याभिमुखीभूयावस्थितां शिञ्जानकङ्कणोत्कराभ्यां कराभ्यां धम्मल्लबन्धं मनाग्विवृतभुजामूलपेशलं मुहुर्दृढीकुर्वाणां तामभित एव स्थितवानिति । ततस्ततः । किं ब्रवीषि । ततोऽहं,

किं स्वेच्छातो रसयतु पिकः पल्लवं चूतवल्ल्याः
किं वा तस्याः पुनरनुमतेः किन्नु तन्वङ्गि! दानात् ।
इत्यप्राक्षं सकुतुकमथो जातरोमाञ्चगात्री
सा मे प्रादाद् द्रुतमधरमेवोत्तरं चित्ररूपम् ॥४७॥

इति । ततस्ततः । किं ब्रवीषि । ततोऽहं मुहूर्तेऽतीतेऽपवरकाद् बहिर्गतस्तत्र शारिकापञ्जरं शिशुजनेन क्रीडनकं क्रियमाणं विवृतद्वारं शारिकाशून्यं च दृष्ट्वा भृशमुद्विजमानस्तदेनदपि चादाय तामेनामन्विच्छन् अत्रागतो भवतैवमाश्वासितोऽस्मि इति । गृह्यतामेषा शारिका । (इति शारिकादानं नाटयित्वा) किं ब्रवीषि । दिष्ट्या सिद्धार्थोऽस्मि । एष सत्वरं गच्छामि इति । (स्वगतं) गतोऽयम् । (किञ्चिदूर्ध्वमालोक्य) अये गगनाध्वनः पादभागमाक्रान्तवानसौ भास्वान् । सम्प्रति हि,

शोषाय धान्यनिकरानजिरे विकीर्य
रक्षन्नलिन्दभुवि गेहिजनो मुदास्ते ।

भाध्यातपप्रबलतास्मरणेन पान्थ-
वर्गः पथि द्रुततरं चरति श्रमेण ॥४८॥

अतः सत्वरं गच्छामि । (इति परिक्रम्यालोक्य च) अये इदं सोमसेनाया भवनं दृश्यते । अपि नामेह वर्तते सा सुगात्री । उपसृत्य तदवगच्छामि । (इति किञ्चिद् गत्वालोक्य च) असंशयं सात्र वर्तते । अन्यच्च,

द्वारे बाह्ये रोधिका चेटिकेयं
बाढं तिष्ठत्यन्तरे त्वर्गला च ।
खड्गोऽलिन्दे वर्तते चैष यत्त-
न्मन्येऽत्रान्तः कोऽपि धन्यो युवास्ति ॥४९॥

तत् साम्प्रतं ममात्र प्रवेशोऽसाम्प्रतमेव । सत्वरं गच्छामि । (इति परिक्रम्यालोक्य च) अये इयं मौहूर्तिकोत्तमस्य कालकेतोः प्रेयसी मञ्जुकेशी ममागतिं प्रतीक्षमाणा मार्गद्रुमस्य मूलभूमौ तिष्ठति । एनामुपेत्य कुशलप्रश्नादिकं करोमि । (इति किञ्चिद् गत्वाकाशे) भद्रे मञ्जुकेशि ! चिराद् दृष्टासि । अपि कुशलं ते । किं ब्रवीषि । कुशलमिति । कुतस्त्वमिदानीम् । किं ब्रवीषि । मन्दारिकाया मन्दिरादिति । किमर्थं त्वया तत्र गतम् । किं ब्रवीषि । तस्या दुहितुः कामसेनाया यौवने समुन्मीलिते चतुष्षष्टिकलातन्त्रपारायणग्रहणविघ्नापातविशङ्कया मारकेलीनाट्यपूर्वरङ्गो मङ्गलसूत्रबन्धनोत्सवो न निर्वर्त्यते । तदयुक्तमिति तद्बन्धुजनाय वक्तुं तत्क्रियाकृते भावेन कालकेतुना निरूपितं सुमुहूर्तं निवेदयितुं चेति । कदा स भविता । किं ब्रवीषि । आगामिनः पूर्वपक्षस्य पञ्चम्यां तिथाविति । किं पुनरेतदुत्तरीयान्तसंवृतं वर्तते ते हस्ते । किं ब्रवीषि । एष कोऽपि चित्रफलक इति । द्रष्टुमिच्छाम्यहं तच्चित्रम् । अर्पयैनं मे हस्ते । किं ब्रवीषि । ही ! ग्राम्यं भवत्येतन्नाहमेनमर्पयिष्या-[1]

---

१. 'मर्पयामीति' ख.

नाटयित्वालोकयन् स्वगतम्) अये एतेऽत्र केचिद् रतिविशेषा आलिखिताः । तथाहि—

एषा कापि सुदृक् प्रियं स्मरबलादाक्रम्य पार्श्वद्वय-
न्यस्ताकुञ्चितजानुपादयुगळा सञ्चुम्ब्य चास्याधरम् ।
वक्षोभुव्युपपीडितस्तनयुगा संश्लेषमातन्वती
श्रोण्या वारिपिधानमुक्तपुळिनश्रीदृश्यया नृत्यति ॥५०॥

अपिच,

काप्यन्यैषा श्रोणिमारुह्य पत्यु-
रध्यासीनाकुञ्चितोज्ञानुपादम् ।
बन्धोन्मुक्तव्यस्तकेशी विलोलत्-
पीनोरोजा मारनृत्तं विधत्ते ॥५१॥

किञ्च,

एषान्या गृहकुड्यमाश्रितवतः कान्तस्य बाहामयीं
दोळामुत्पुळकाधिरुह्य निजदोर्द्वय्यास्य कण्ठं श्रिता ।
श्रोण्या पर्वतमेखलापरिणमत्कुम्भीन्द्रशीर्षाभया
कुड्ये पादपयोजविक्रमवशात्प्रेङ्खन्त्यलं खेलति ॥५२॥

(सविशेषमालोकयन्) अहो बत,

अस्त्येतेषां परा चित्रमिथुनानां सुरूपता ।
अत्र याते दृशौ मे न प्रत्यायातुमिच्छतः ॥५३॥

तेनैनल्लोकोत्तरसुरूपत्वशालिनः कस्यचिज्जनस्य कौशलं तर्कयामि ।

चित्रकारस्य सौरूप्यश्रीरेवांशतया गता ।
चित्रेषु दृश्यते व्यक्तमपत्येषु यथा पितुः ॥५४॥

पृच्छाम्येतदेनाम् । (आकाशे) भद्रे ! कथय कस्य जनस्यैतत्कौशलम् । किं ब्रवीषि । मया तस्य जनस्याभ्यर्थनया जनेभ्यस्तस्यानाख्यानमङ्गीकृतमेव तत् तदर्थं भावो निर्बध्यालम् इति । स्त्रिया पुंसा वैतदालिखितं तद् ब्रूहि । किं ब्रवीषि । स्त्रियेति । सा कस्मात्पुनरेतस्यात्मलिखितत्वं निह्नुते । किं ब्रवीषि । आत्मनः कौमारपरत्वेनेदृशेषु कौतुकोदयस्याप्रकाश्यत्वादिति । एवं चेदेतन्मन्दारिकादुहितुस्तस्याः कामसेनायाः कौशलविलसितं मन्ये । किं ब्रवीषि । अहो परमार्थगामिनी भावस्य मतिरिति । सा किमर्थमेवमालिखितवती । किं ब्रवीषि । कामागमेषूपदेशाद् गृहीता इमाः प्रक्रिया औत्सुक्यात् प्रयोगेषु योजयित्वा द्रष्टुमिति । साध्वेतत् । किं ब्रवीषि । एष चित्रफलको मम शयनागारे प्रतिष्ठापयितव्यो भवति । तदेनं मे दातुमर्हति भाव इति । प्रतिगृह्यतामेष चित्रफलकः । (इति चित्रफलकदानं नाटयित्वा) किं ब्रवीषि । अचिरेण पुनर्दर्शनमस्तु । एषाहं गच्छामीति । (स्वगतम्) गतेयम् । (औत्सुक्यमभिनीय) हन्तैतन्मे मनोऽकाण्डे मन्मथग्रहबाधया तत्तादृग्गुणपूर्णां तां कामसेनां प्रपद्यते । तेनाहमतस्तां द्रष्टुं मन्दारिकामन्दिरं गच्छामि । (इति परिक्रम्य पुरस्तादालोक्य च) अये ! एतन्मन्दारिकामन्दिरम् । सत्वरमत्र प्रविशामि । (इति प्रवेशं नाटयित्वा)

अहो सुराङ्गनागेहमाविष्टस्येव मेऽधुना ।
मनस्तनोति हर्षाब्धौ मज्जनोन्मज्जनान्यलम् ॥५५॥

(पुरस्तादालोक्य) अये इयं कामसेनायाः कनीयसी बालिका विद्रुमाङ्गी वयस्याभिः समं क्रीडन्ती सञ्चरति । इयं हि,

---

१. ' द्रष्टुं सत्वरं मन्दारिका ' ख.

आस्कन्धान्तविलम्बिवक्रचिकुरा निर्व्याजनीलेक्षणा
गुञ्जामञ्जुकुचाङ्कुरालपकवालिर्नोद्भिन्नरोमावलिः ।
पूगीगुच्छककञ्चुकांशुकधृतव्यालोक्यकाञ्चीपदा
तांस्तान् भाविदशाविचिन्तनरसान् सूते परं पश्यताम् ॥५६॥

(पार्श्वत आलोक्य) अये इयं सा कामसेना,

पूर्णा मे लोचनादीनां पुण्यसम्पत्तिरीदृशीम् ।
रम्यां परिणतिं दैवादवाप्येवात्र तिष्ठति ॥५७॥

अहो अधरितनिखिलोपमाननिर्भरमनोरमेयमस्या अङ्गप्रत्यङ्गानां सौन्दर्यश्रीः । तथाहि—

अस्या दृशोश्चारुतया नितान्तं
पराजितत्वान्निजलोचनानाम् ।
जातेन लज्जातिशयेन नूनं
वनेषु गूढं हरिणाश्चरन्ति ॥५८॥

अस्याः सुचार्व्या रदनच्छदश्रिया
स्वस्यावमानादतिदुःखिता ध्रुवम् ।
आरामवल्लीततिपल्लवावली शोभाक्षयं
याति दिने दिने क्रमात् ॥५९॥

अपिच,

अस्या वक्षोजयोर्भङ्ग्या दर्शनाल्ल(ज्जितां)ज्जया) ध्रुवम् ।
प्रत्याया(ति)न्ति) निशास्वेव पद्मानि कलिकात्मताम् ॥६०॥

---

१. 'तो ध्रु' ख.

अन्यच्च,

मनोज्ञयास्या जघनस्य भङ्ग्या पराजिताङ्गेषु रथेष्वरागात् ।
नूनं मनोभूर्मलयानिलेन मानी विधत्ते विजयप्रयाणम् ॥६१॥

किं बहुना,

ब्रह्मा स्वकान्तासकलाङ्गचिन्तया
शृङ्गारवान् सन् मदनस्य शासनात् ।
एनामसाधारणरूपसम्पदं
नूनं प्रमादेन विनेव सृष्टवान् ॥६२॥

(औत्सुक्यमभिनीय)

उरोनिबिडपीडनाविनतवर्तुळोरोरुहं
[1]दरात्तरसिताधरं दरनिमीलिताक्षं क्रमात् ।
इदं स्मरवशात्स्वयं च्युतदुकूलमस्याः कदा
बतानुभवितास्म्यहं रहसि नूतनं यौवनम् ॥६३॥

(पुनर्निरीक्ष्य) इयं परिचारिकाजनेन लीलाविहङ्गानां पञ्जरपरिक्षाळनादिकं कारयित्वा स्वयमेव तान् भोजयितुमारभते । अहो बत,

अस्याः प्रवाळच्छविना करेण
जपारुणे केळिशुकस्य तुण्डे ।
प्रणीयमानं परिपाकशोणं
बिम्बीफलं न स्फुटतामुपैति ॥६४॥

मुग्धेयमनतिपरिचितेन मया न सहसैवोपसरणीया । तद्यथास्या दृष्टिगोचरो भवेयं तथा तिष्ठामि । (इति पदान्तरे स्थित्वालोक्य च) इयं

---

१. 'दरात्त' ख.

परिचारिकया समागतिं कर्णे निवेदिता सत्वरमितोऽभिमुखीभूता। किञ्च,

अभिवृत्तिपरावृत्तिवशाद् दोलाधुरन्धरैः ।
सुधार्द्रैरिव हृद्यैर्मां कटाक्षैरभिनन्दति ॥६५॥

अतः किञ्चिदासीदामि तावत् । (इति किञ्चिद् गत्वालोक्येर्ष्यां नाटयन्)

लीलाशुकोऽयं जगतीह भाग्यवान्
नूनं यदिन्दीवरदामसुन्दराः ।
अस्याः कटाक्षाः प्रतिवीक्षितेषु मे
निःशङ्कमस्मिन्नुपयान्ति विश्रमम् ॥६६॥

(कर्णं दत्त्वा) एनया कळभाषिण्या कर्णे मन्दमुपदिश्यमानोऽयं छेकः कथं भाषते-

अयि मधुकर! ते स्वागतमधुनात्र कुतस्त्वमागतवान् ।
नळिनीवनादुताहो आहो लीलाटवीलताभवनात् ॥६७॥

इति। (प्रहर्षमभिनीय) इयं लीलाशुकमुखेन मह्यमुपचारवचनमेवोक्तवती। उपसरामि तावदेनाम्। (इति किञ्चिद् गत्वालोक्य च) एषा सुगात्री लज्जया किञ्चित्परावृत्ता कीरपञ्जरेणात्मानं मनागन्तर्धाय स्थितवती। (कर्णं दत्त्वा) किं पुनरेतदङ्घ्रिमञ्जीरशिञ्जितमिवान्तिके श्रूयते। (इति पार्श्वत आलोक्य) ज्यायसी गणिकाकुलमहाचार्यस्यार्यचन्द्रसेनस्य प्रेयसी मन्दारिका तूर्णमूर्णामयं किमप्यासनमादाय मामुपागच्छति। एषा हि,

---

१. 'क्य) एषैतस्या ज्यायसी ' ख.

प्रत्यग्राम्बुदकान्तकुन्तलभरा त्रस्तैणशावेक्षणा
बन्धूकप्रसवोज्ज्वलाधरपुटा कुम्भाभिरामस्तनी ।
दिग्दन्तावळशीर्षपीनजघना रक्ताब्जराजत्पदा
कस्यालं वितनोति नो नयनयोरानन्दनं मानिनी ॥६८॥

एनामभिवर्ते तावत् । (इत्यन्यतोमुखः स्थित्वा) एषा मम पुरस्तादासनं न्यस्योपचारवाचं वक्तुमारभते । (आकाशे) मन्दारिके! किं भवती ब्रवीति । स्वागतं भावाय, एतदासनम्, आस्तामत्र भावः इति । आसे तावदेतस्मिन् । (इति पदान्तरे आसित्वा) किं भवती पृच्छति । अपि कुशलं भावस्येति । कुशलमेव । किं भवती पृच्छति । अपि कुशलं भावस्य पितुरस्मज्जननीसतीर्थ्यस्यार्यकलावल्लभस्येति । कुशलमेव । किं पुनर्भवती पृच्छति । कुतः साम्प्रतमत्रागतो भावः । किं प्रेयस्या मालिन्या मन्दिरादाहो अत्रत्यायाः कस्याश्चिद् भवनादिति । स्वमन्दिरादेव । किं भवती ब्रवीति । आगमनसमयमालोकयन्त्या मया किञ्चिदुत्प्रेक्षितम् । तदाकर्णयतु भाव इति । एवं तावत् । किं भवती ब्रवीति ।

पूर्वस्मिन् वपुषीशदृष्टिशिखिना प्लुष्टे ततो माधवा-
द्यल्लब्धं मुनिशापदावपतनात्तस्मिंश्च नष्टे पुनः ।
ताभ्यामप्यतिरम्यमन्यदधुना लब्ध्वा कलावल्लभा-
न्नूनं लोकहितार्थमत्र मदनः साक्षादयं वर्तते ॥६९॥

इत्थमिति । आस्तां चाटुरचना । प्रस्तूयतामस्ति चेदन्यद् विनोदनाय । किं भवती ब्रवीति । किं तावद् रोचते भावायेति । (स्वगतं)

---

१. स्थित्वा) 'खनेन चित्रितं' इत्यादि कगाठादधिकतया अप्रकृताः नष्टौ पङ्क्तयः खपाठे दृश्यन्ते ।

कामसेनायाश्चेष्टितादन्यत् किमपि न मे साम्प्रतं रोचते । तत्र वक्तुं युक्तं च । तेनैवं वदामि (आकाशे) यन्मन्यते भवती । किं भवती ब्रवीति । एवं तावदिति । (स्वगतं) कथमेषा कनीयसीं वक्ति— वत्से कामसेने! भावस्य विनोदनाय सङ्गीतं साम्प्रतं प्रयुज्यतामिति । (पार्श्वत आलोक्य) इयं कामसेना यदनुशास्त्यार्येति सत्वरं गत्वा वास-गृहाद् वीणामादाय मन्दाक्षेण मन्दमित आयाति ।

अहो विचित्रमेवास्या अङ्घ्रिविक्षेपसौष्ठवम् ।
अस्माल्लज्जाकुला नूनं हंसा यान्ति दिवं भुवः ॥७०॥

(पुरस्तादालोक्य) एषा सुरूपा मे पुरस्तादभ्येत्य परिचारिकया तूर्णमुपा-नीते ऊर्णामये वरासने लज्जया सविलम्बमासित्वा पुन*—

.........समधुव्रतरसिकप्रत्याशप्रसृमरोरुसौरभ्याः ।
कच्चित्ते रसभरिताः केळीवनसुमनसः प्ररोचन्ते ॥७१॥

अये एष माळविरागः प्रयुज्यते । अहो मधुरतरा एते प्रयोगाः । (इत्यल्पकालं नीत्वा) हन्तावसायित एष रागः । अये एषा मां प्रति गीति[1]व्याजेन नर्मसम्भाषणमेव कृतवती । अहो बत,

मुग्धैषा प्रौढेव प्रागल्भ्यं किमपि पुष्णाति ।
कोरकिता कल्पलता सौरभ्यं पुष्पितेव पुष्यति हि ॥७२॥

(विशेषं निरीक्ष्य) ही बत,

एषा मुखाम्बुजोद्भिन्ना मुक्तापङ्क्तिरिवोज्ज्वला ।
स्वेदाङ्कुराळिरेतस्या व्यक्तं वक्ति श्रमोदयम् ॥७३॥

---

* अत्र क. ख. पाठयोः किञ्चिल्लुप्तं प्रतिभाति ।

---

1. 'गीतव्या' ख.

तदेवं तावदेनां ब्रवीमि । भद्रे कामसेने! साधु साधु ।

अभिवाञ्छा विनोदेऽस्मिन् मुहुरेधत एव मे ।
अमृतास्वादने कस्य संतृप्तिरुपजायते ॥७४॥

तथापि भवती श्राम्यतीति दूयते मे चेतः । तदलमिदानीम् । किं भवती ब्रवीति । यथाह भाव इति । (स्वगतं) एषा वीणां पुरस्तान्न्यस्य विश्रा-[1]म्यति । (जृम्भणं कृत्वा),

अयमारभते मारः साहसं चेष्टितुं मयि ।
एतस्या गात्रसंयोगो न प्राप्तसमयोऽस्ति च ॥७५॥

तत् किमिदानीं करणीयम् । (पार्श्वत आलोक्य) एषा मन्दारिका परिचारिकाभिः समं किमपि मन्त्रयित्वा मां वक्तुमारभते । (आकाशे) मन्दारिके! किं भवती ब्रवीति । केळीमृगाः पिपासया कूपोपान्तं समेत्य क्रन्दन्ति । तेभ्यो जलं दातुं परिचारिकाभिः सममेषाहं सत्वरं गच्छामीति । (स्वगतं) परिचारिकाभिः सहेयं सत्वरं गता । (पर्युषितसुमनसां व्यपगमेन रमणीयां कल्पवल्लीकलिकां काममालोकयन्)

एषा त्रस्तैणशावाक्षी प्रहिणोति मुहुर्मयि ।
अपाङ्गालोकनव्याजादस्त्रं माराधिदैवतम् ॥७६॥

(कामतापमभिनीय)

उदेति तापो हृदि पूर्वतोऽधिको
ममाधुनैनामिह पश्यतो यतः ।
विलासिनीनां विजने विलोकनं
मनोभुवोऽलं बलमातनोति हि ॥ ७७ ॥

---

१. 'विश्राम्यति' ख.

एनया सह मनाक् सल्लापलीलां करोमि तावत् । (आकाशे) भद्रे! कथयतु कस्मादाचार्यादिमा विद्याः शिक्षितवती भवती। किं भवती ब्रवीति । आर्यपादात् कलादेवनाम्नो द्रमिळभूमिदेवादिति । कुत्र साम्प्रतं वर्तते स महात्मा। किं भवती ब्रवीति। अत्रैव विद्यावेश्मनीति। सम्प्रति किमभ्यस्यति भवती। किं भवती ब्रवीति। वात्स्यायनीयं नाम कामशास्त्रमिति। तस्मिन्नेव केवलं परिश्रम्यालम्। रतिरहस्यमपि काममभ्यस्यतु भवती। किं भवती ब्रवीति । यथाह भावः इति। (स्वगतं) एषा झटित्यार्जवेनानूद्य पश्चान्मम वाक्यस्य वक्रतां ज्ञात्वा लज्जया मुखमवनमयति । (विशेषान्निरीक्ष्य) एतस्यामप्येतत् किञ्चिद् भावाविर्भावलक्षणं सम्प्रति प्रतीयते । तथाहि,

पुष्पाणां पातोऽयं वदति कबर्या निवेशविश्लेषम् ।
नाभेरेषा व्यक्तिर्वक्ति च नीव्या निबन्धविश्ल(दशाम् * १श्लथताम्) ॥

तावदेनां प्रत्येवमपदिशामि । (आकाशे) अयि सुतनु! किं न दृश्यते,

इमामद्य श्वो वा प्रसरदुरुसौरभ्यविभवं
विकासं यास्यन्तीमतिरुचियुतो जातिकलिकाम् ।
उपेत्यायं पश्यन् निकटकृतवासो मधुकरो
न भोक्तुं न त्यक्तुं प्रभवति न चान्यत् कलयितुम् ॥७९॥

किं भवती ब्रवीति । (स्वगतम्) एषा कौमारपरतया त्रपया च यथाभिमतं मां प्रतिवक्तुं न शक्नोति । तेन पुनः,

---

* अतः परं क. ख. पाठयोः किञ्चिल्लुप्तं प्रतिभाति ।

---

१. 'द्रामिळ' ख.

विपञ्च्यां कश्चिदाबध्य सुमनोमालिकागुणम् ।
मौग्ध्यात् संक्रीडमानेव करोत्येनां भुजान्तरे ॥ ८० ॥

अतो नूनमयं मनोरथस्तस्य कल्याणसूत्रबन्धनोत्सवस्यानन्तरं सुसाध इति शब्दबन्धेन विना व्यक्तं वक्ति । तावन्तं कालं पुनरिमामुत्कण्ठां कथं सहिष्ये । (पार्श्वत आलोक्य) इयं काचिद्देशवृद्धा सत्वरमितः समायाति । इयं हि,

पलितश्वेतकेशौघा वलीविश्लथविग्रहा ।
शुष्कस्तनी जरा साक्षान्मूर्तेवाप्रियदर्शना ॥ ८१ ॥

(कर्णं दत्त्वा) एषा कथमेनामभ्येत्य वक्ति । वत्से ! श्रूयतामार्यस्य कलादेवस्यैतदनुशासनम् । यथा,

विद्यार्थिन्यास्तवायं नो समयः (स्त्रौ?स्त्र)च्छयेहितुम् ।
संरक्ष्यं हि मनःस्थैर्यमुपदेशजिघृक्षुभिः ॥ ८२ ॥

अपिच पुनरद्य प्रभृति,

व्याख्या वात्स्यायनीयस्य कामतन्त्रस्य गृह्यताम् ।
प्रौढानां वचसामर्थाः स्फुटाः स्युर्व्याख्ययैव हि ॥ ८३ ॥

तत्सत्वरमत्रागन्तव्यमिति । तेनोत्तिष्ठ तूर्णं गच्छाव इति । (पुरस्तादालोक्य) एषा सुतनुः यदनुशास्त्यार्यपादा इति त्वरितमुत्थिता । किश्चैनां कर्णे किञ्चिदुक्त्वा यथायातमेव यापयित्वा (मा मा?मां) प्रष्टुमारभते । (आकाशे) मधुरवाणि ! किं भवती ब्रवीति । श्रुतमार्यपादानां मां प्रत्येतदनुशासनं भावेनेति । अथ किम् । किं भवती ब्रवीति । तन्मयेदानीं विद्यागृहमवश्यं गन्तव्यमिति । अवलितमुख-

मित एव विलोकयन्ती द्वारस्य पार्श्वभित्तिभागे सङ्केतिकस्तना(म?)-विलम्ब्यावासगृहोदरं प्रविष्टवती । समाप्तो मे लोचनयोरद्यतनो महोत्सवः । गच्छामि तावदतः (इति परिक्रम्यातपस्पर्शमभिनीयोर्ध्वमवलोक्य च)

हन्तासावादित्यो दैत्य इवोग्राः परिक्षिपन् हेतीः ।
तीव्रोष्मा द्योवीथीमध्याक्रान्तो नितान्तमुद्भाति ॥ ८४ ॥

सम्प्रति हि,

उद्यज्ज्वालं ज्वलति नितरामुग्रसेनातपेन
स्फाराटोपस्फुटदगनगव्रातमातप्यमाना ।
मृष्टाष्टयर्थं सकलतनुभृत्संहतिं पक्तुमिच्छो-
र्मृत्योः कालज्वलननिहिता पाकपात्रीव धात्री ॥ ८५ ॥

(सौत्सुक्यं चिन्तामभिनीय)

यत्पूर्वमाश्लेषकृतामतानीदौष्ण्यात् सुखं तत्त्वधुना हिमत्वात् ।
तनोति गात्रं तरुणीजनस्य कदा पुनस्तन्न करोति सौख्यम् ॥८६॥

(गात्रग्लानिमभिनीय) हा कष्टमतिकठोरोऽयमातपो मां दहतीव । ततः छायाशीतळे कस्मिन् प्रदेशे वर्तमानः कर्कशमिमं समयं गमयामि । (इति पार्श्वत आलोक्य) अये आसन्नोऽयमसूर्यम्पश्यभूरशोकपाळिका नाम पुष्पवाटिका । सत्वरमेनामुपेत्य प्रविशामि तावत् । (इति किञ्चिद् गत्वालोक्य च) अहो अतिरमणीयैषा पुष्पवाटिका । अथवैनां वर्णयित्वालम्,

वल्लीवेश्मसु सुरतश्रमश्लथात् सुरमृगीदृशां कैश्याद् ।
गळिता नन्दनसुमनस्ततिरेतस्या विशिष्टतां वदति ॥ ८७ ॥

---

१. 'मालोक्य' ख. २. 'लः' ख.
३. 'त्वा प्रवेशनं नाटयित्वालो' ख.

स्वच्छन्दमत्र किञ्चित् सञ्चरामि । (इति परिक्रम्य परितः आलोक्य च) अये कुसुमितसमस्तलतासालजालोऽयं विजृम्भते मधुमासः । सम्प्रति हि,

स्त्रीणां सदैव पृथुलस्तनपीडिताङ्गै-
रालिङ्गनैर्युवजनः पुळकं दधाति ।
अप्राप्ततत्कुचतटीघटनः कथञ्चित्
पुष्पोदयं कुरवकप्रकरो बिभर्ति ॥ ८८ ॥

अपिच,

वियोगिनां त्राणकृते कृतानां
क्रियाक्रमाणां फलहीनतायाः ।
सुहृज्जनो मुञ्चति बाष्पधारां
रुणद्धि कः कालकृतां विपत्तिम् ॥ ८९ ॥

(पुरस्तादालोक्य) इमे विलोलकिसलयाङ्गुलयो लतापादपा विहङ्गकूजनव्याजेन मामाह्वयन्ति । सम्भावयाम्येनान् समीपोपसर्पणेन । (इति किञ्चिद् गत्वालोक्य च)

अयं नीरन्ध्रसञ्जातपुष्पसंहतिसंवृतः ।
हिरण्मय इवात्यन्तं शोभते कोऽपि चम्पकः ॥ ९० ॥

अहो बत,

क्षरन्मरन्दान्युरुसौरभाणि
नैवास्य पुष्पाण्यळयो लिहन्ति ।
गुणाभिरामा अपि केचिदर्थाः
प्रायेण केषाञ्चन सन्त्यनिष्टाः ॥ ९१ ॥

(पार्श्वतः आलोक्य)

एतौ प्रसूनविसरप्रसरत्सुगन्धा-
वन्योन्यगाढपरिरम्भविषक्तशाखौ ।
वासन्तिकाकुरवकौ लसतो नितान्त-
मामोदि किं न मिथुनं घटितं विभाति ॥ ९२ ॥

(पदान्तरे आलोक्य) इदमनेकलतापरिवेष्टनमेदुरं किमपि सहकारलतागेहं दृश्यते । एनदुपसरामि । (इति किञ्चिद् गत्वा)

पुष्पलोभभ्रमद्भृङ्गसङ्गीतमुखरान्तरम् ।
अहो एतल्लतागेहं मनो मे नन्दयत्यलम् ॥ ९३ ॥

अत्र प्रविशामि ... ...
... ... गैकसंसक्तदृष्टिः ॥
मिथः समागमेनाभिनन्दद्भ्यामेताभ्यामविज्ञातागतिरेव त्वरितमतो गच्छामि (इति परिक्रम्य पुरस्तादालोक्य च)

तापिञ्छमुद्गुच्छमवेक्ष्य मेघ-
भ्रान्त्या वितत्यैष शिखण्डभारम् ।
शिखावलो नृत्यति कस्य नेष्ट-
वस्तुभ्रमस्तत्समदर्शनेऽस्ति ॥ ९४ ॥

(पार्श्वत आलोक्य) अये ! माधवीजालपरिवलनातिघनं मनोहरमिदं किमपि डाडिमलतागृहम् । (कर्णं दत्त्वा)

सझङ्कारोद्भ्राम्यद्भ्रमरनिकरोऽस्मिन् विहरते
ध्रुवं कामावेशात् किमपि मिथुनं चौर्यविधिना ।

---

१. 'सवस्तु' ख.

अताराव्यक्तास्ता विहृतिफणितीस्तस्य विविधाः
शुकस्तारव्यक्तं यदयमुपरिस्थोऽनुवदति ॥ ९५ ॥

निभृतमुपेत्य लतावलयान्तरेण निरीक्ष्येनत्त(द्धेनीत्त्वेन) विजानामि । अथवालमसमये निरीक्षणेन । प्रलम्बशाखाचक्रस्यैतस्य तापिञ्छस्य मूलभूमौ स्थित्वातोऽस्य निर्गतिं तावत् प्रतीक्षे (इति पदान्तरे स्थित्वा-लोकयन्) अये ! इयं मन्युवर्मणः परिग्रहो मधुकरिका,

असितकमलमालालग्नलोलम्बपङ्क्ति-
द्युति चिकुरकदम्बं बन्धमुक्तं वहन्ती ।
श्रमजलकणमुक्ताजालकालङ्कृताङ्गी
सतनुरिव जयश्रीः पुष्पकेतोर्निरेति ॥ ९६ ॥

किञ्चेयं लतागृहद्वारभूस्थितस्य बालबकुलस्य मूलदेशमधिष्ठितवती,

शिञ्जानकङ्कणगणेन करद्वयेन
केश्यं मनाग्विवृतमञ्जुलबाहुमूलम् ।
आबध्नती मृदुविधूतलताप्रतान-
मभ्यापतन्तमभिनन्दति मन्दवातम् ॥ ९७ ॥

एनामुपेत्य कुशलप्रश्नादिकं करोमि तावत् । (इति किञ्चिद्गत्वा आकाशे) सखि मधुकरिके चिराद् दृष्टासि । अपि कुशलं ते । किं ब्रवीषि । कुशलमेवेति । अन्यदपि किञ्चिन्मे प्रष्टव्यमस्ति । किं ब्रवीषि । पृच्छयतां को निरोधः इति ।

कस्माच्छ्रान्ता भवसि

किं ब्रवीषि ।

लतिकासद्मसम्मार्जनायाः

इति ।

केनैषा ते क्षततितिरभूत्

किं ब्रवीषि ।

केतकीपत्रकृष्ट्या ।

इति ।

रोमाञ्चोऽयं समजनि कुतः

किं ब्रवीषि ।

शीतवाताभिमर्शात्

इति ।

कस्मादेताः कथय सिकता जानुनोश्चोरि ! लीनाः ॥९८॥

(स्वगतम्) कथमेषा लज्जया तूर्णमवाङ्मुखी भवति । पुनरप्येनां प्रति किञ्चिन्निर्बध्नामि (आकाशे) धूर्ते ! लोप्त्रेषु प्रत्यक्षदृश्यमानेषु किं चौर्यस्य निह्नवेन । कथ्यताम् । कस्तवास्ति सहकारी । किं ब्रवीषि । कोऽन्यः । मन्युवमेवेति । स चेत् कुतो निगूढास्तिष्ठति । किं ब्रवीषि । तत्पुनरहं न जानामीति । अहमेव तावल्लतागृहं प्रविश्य तस्य तत्त्वमवगच्छामि । (इति किञ्चिद्गत्वा आलोक्य च) अयं मे शैशवक्रीडासखः पद्मकेतुः लतागृहद्वाराभ्यन्तरे मञ्जरीकुञ्जान्तरितार्धगात्रः तिष्ठति । नूनमयमेवेह एनया समं चौर्यविहारमनुभूतवान् । यतः—

अयं मामत्र संपश्यन्नपि नाभ्येति पूर्ववत् ।
सुहृदोऽप्यभियाने ह्रीश्चिह्नमीदृशकर्मणाम् ॥९९॥

इत एनमाह्वयाम्येव । (आकाशे) सखे पद्मकेतो ! त्वमितस्तावदागच्छ । किं ब्रवीषि । एषोऽहमागच्छामीति । (पुरस्तादालोक्य च स्वगतम्) एष सखा मामुपागतः । एनं परिष्वज्य कुशलप्रश्नादिकं करोमि तावत् ।

(इति परिष्वङ्गं नाटयित्वा आकाशे) सखे! चिराद् दृष्टोऽसि । अपि कुशलं ते । किं ब्रवीषि । कुशलमेव । किञ्च चिरादद्य कृतार्थोऽस्मीति । सम्यगेवैतत् । (इति हसित्वा) किं ब्रवीषि । सखे! परिहासेनालम् ।

भवतो दर्शनेनैतद् यौवनोल्लासिनोऽपि मे ।
चित्तं ताः शैशवे क्रीडाश्चिन्तयोन्मोदते भृशम् ॥ १०० ॥

इति । सत्यमेतन्ममाप्येवमेव । किं पृच्छसि । किमर्थमद्य प्रव्रजति भवानिति । तन्निगदितुं नायं समयः । श्वः परश्वो वा त्वं श्रोतासि । किं ब्रवीषि । यथा भवान् मन्यत इति । (पार्श्वतः आलोक्य स्वगतम्) एषा मधुकरिकास्य रहस्यस्य निर्भेदादुद्वेगिनी वर्तते । एवं तावदेनां ब्रवीमि । (आकाशे) सखि मधुकरिके! त्वमगदङ्कारमतत्त्वज्ञा गरदायिनं शङ्कसे । किं ब्रवीषि । विप्रत्यभिभवाद् बिभ्यतमेतमात्मनः परिचारिकाजनमनुकम्पया गोपायतु तावद् भावः इति । अयि भीरु! नेदं वक्तव्यम् । (स्वगतम्) अन्योन्यानुरागिणोरेनयोरयं रहस्संमागमोऽनुमोदनीय एव । (पदान्तरे आलोक्य)

इमौ कावप्यहो कोकौ प्रेम्णा संश्लेषिणौ मिथः ।
अध्यास्य माधवीवल्लीं पुष्णीतोऽस्याः कुचश्रियम् ॥ १०१ ॥

एनावेवमपदिशामि तावत् । (आकाशे)

युवानौ हे कोकौ! तपदहिमभानाविह दिने
युवां चेतोहारिव्रततिभवनेऽस्मिन्नुपवने ।
अविघ्नं भुञ्जाथां मनसिजमहान् कौतुकवहा-
नवस्था वामन्या विलसदमृतांशौ निशि भवेत् ॥ १०२ ॥

---

१. 'स्संगमो' ख.

(पुरस्तादालोक्य) एतौ मे सखायावौत्सुक्येन परस्परं निरीक्षमाणौ स्मयेते । अतः परं पुनर्मया येन केनापि व्याजेन सत्वरं गन्तव्यमेव । (कर्णं दत्त्वा आकाशे)

अयं पुंस्कोकिलः कश्चिदाराद् वल्लीगृहान्तरे ।
कुहूभिश्चारुताराभिर्मुहुराह्वयतीव माम् ॥ १०३ ॥

अयि सखायावचिरेण वां पुनर्दर्शनमस्तु । एषोऽहं विश्रमाय तत्र गच्छामि (इति परिक्रम्य पुरस्तादालोक्य च) अये प्रतिशाखप्रततविविध-लतामण्डलमञ्जुरेष कोऽपि माकन्दलतामण्डपः । अत्र प्रविश्य घटिका-मात्रमुपविश्य विश्राम्यामि । (इति प्रवेशं नाटयित्वोपविश्य स्पर्शमभिनीय च)

गन्धेभगण्डकषणक्षतचन्दनद्रु-
निष्यन्दमानरसनिर्झरशीकरार्द्रः ।
हन्तैष बालपवनो मलयाद्रिजन्मा
मन्दं स्पृशन् विकिरतीव सुधां तनौ मे ॥ १०४ ॥

(पुनरपि स्पर्शमभिनीय) अये एष कोऽपि जनः पश्चादागत्य कमलाभ्या-मिव मृदुलाभ्यां पाणिभ्यां मम दृशौ निबध्नाति । स्पर्शेन योषेव प्रति-भाति च । एवं तावदुक्त्वा प्रत्युक्तौ स्वरव्यक्त्या तत्त्वमवधारयामि । (आकाशे) भद्रे! ज्ञातासि । त्वं मुञ्च मे दृशोर्बन्धनम् । किं ब्रवीषि । एवं चेत् किमप्यभिज्ञानमभिधीयतामिति । (स्वगतम्) एषा ममानिश्च-यायान्यस्वरेण वक्ति । तथाप्येनां चिरपरिचयप्रणयिनीं तां कुमुदा-मोदिनीं तर्कयामि । तस्याः किमपि वृत्तमेवात्राभिज्ञानमभिदधामि । (आकाशे) तदेतच्छृणु तावत्—

स्मरसि तदयि तान्ता त्वं रतान्ते प्रमोहा-
दुरसि मम शयाना यावदीषत्प्रसुप्ता ।

उषसि गृहवधूनां वास्तु संस्कुर्वतीनां
करवलयरवो यद् बोधकस्तावदासीत् ॥ १०५॥

किं ब्रवीषि । अनेककामुकसाधारणमेतदभिज्ञानं न भवतीति । एतत् तावदन्यदाकर्णय ।

तत्सौम्याङ्गी स्मरसि नु रतेः प्रक्रमे तत्र यत् ते
क्षौमं हृत्वा द्रुतमुपवने पुष्पवृक्षे मयास्तम् ।
क्रीडाहेतोस्तदनु विरतावप्यदानेन तस्य
त्वं मद्वासः पृथुनि जघने यद् दधाना रुषागाः ॥१०६॥

किं ब्रवीषि । स्मरामि किन्तु न केवलं तदेव ।

तत्र स्थाने पुनरपि तथैवावयोरेकवारं
सम्प्राप्तिः स्याद् यदि तदनु ते तद् दुकूलं प्रदद्याम् ।
इत्यौत्सुक्याद् गमितगणरात्रोऽथ लब्ध्वेप्सितं तद्
यत्प्रादा मे तदपि सततं सस्मरासि स्मरामि ॥१०७॥

इति । (स्वगतम्) दिष्ट्यैषा सा कुमुदामोदिन्येव । (पुरस्तादालोक्य) एषा दृग्बन्धनं मुक्त्वा सत्वरं मे पुरस्तादागता । (विशेषान्निरीक्ष्य)

दरावनतपीवरस्तनभरा बतैषा सुदृग्
जपारुणरदच्छदा करिशिरःपृथुश्रोण्यपि ।
पुरेव मनसो हृतौ मम भृशं न शक्ताधुना
स्त्रियोऽधिकमनोहरा न हि चिरन्तने यौवने ॥ १०८ ॥

तथापि यथापूर्वमाचराम्येव । (इत्युत्थायालिङ्गनं नाटयित्वा आकाशे) सखि

कुमुदामोदिनि ! चिराद् दृष्टासि । अपि कुशलं ते । किं ब्रवीषि । कुशलमेवेति । किमर्थं त्वमिदानीमिहागतासि । किं ब्रवीषि । मम मातृष्वसेयी चन्द्रिका अम्बायाश्चन्द्रलेखाया नियोगेन कङ्केळिकुसुमान्यवचेतुमेकाकिन्येवेमां पुष्पवाटिकां प्रविष्टवती । तस्याः साहाय्यमाचरितुमिति । किं कार्यं भवेचन्द्रलेखायाः कङ्केळिकुसुमैः । किं ब्रवीषि । भगवतो रतिपतेः पूजनमिति । तत्पुनः किमर्थम् । किं ब्रवीषि । चन्द्रिकाया यौवनोदयसुमधुरं(केला?लोको)त्तरं तद्रूपं बाल्ये जळात्मनो द्विजिह्वस्य प्रसह्य सम्भोगारम्भात् सम्भूतेन पुरुषविरागेण कालकूटबलात्कारदूषित[1]पीयूषवदनुपभोक्तव्यं वर्तते । तस्य प्रतीकारसिद्ध्यर्थमिति । सा पुनरिह कुत्र वर्तते । किं ब्रवीषि । तन्मया न विज्ञायत इति । एवं चेन्न साम्प्रतमत्र विलम्बितव्यं त्वया । किं ब्रवीषि । यथाह भावः । एषा अहं सत्वरं गच्छामीति । (स्वगतम्) गतेयम् । अहमपीतो गच्छामि । (इति परिक्रम्य पुरस्तादालोक्य च) अरुणकुसुमस्तबकभारानतशाखाचक्रमतिमनोहरमेतत् ... ...

... ...
.... रौ साम्प्रतम् ।
तावेतौ कलशोज्ज्वलौ बत कुचौ या नाभ्यधोदिक् पुरा
लघ्वी सम्प्रति सेयमब्धिपुलिनस्पर्धाळुरारोहभूः ॥१०९॥

(पुनर्निरीक्ष्य) अहो लोकोत्तरोऽयमस्या अङ्गप्रत्यङ्गानां सौष्ठवातिशयः । तथाहि—

(सूर्य) चन्द्राविमावस्याः पश्येतां चेन्मु(खं क्वचित् ।)
त्यजेतां द्रुतमन्योन्यसौभाग्याधिक्यमत्स(रम्) ॥११०॥

---

१. 'तयूष' ख.

(अपि) च

अस्याः कण्ठच्छव्याः समीक्षणाज्जातया ह्रिया(नूनम् ।)
अम्बुधिगर्भे सततं संवलते कम्बुनिकुरुम्ब(म्) ॥१११॥

(अपि) च

पश्येयुरस्या यदि रोमराज्याः शोभां स्मर(ज्यास)मिता द्विरेफाः ।
द्राक् पङ्क्तिबन्धुं (त्रपया निली)य राजीवकोशोदरमाविशेयुः ॥११२॥

किं बहुना,

लोकैकमोहिनीमेनां मन्ये मनसिजः स्वयम् ।
निजबा(णेन?णाय)मानैस्तैः कुसुमैरेव सृष्टवान् ॥११३॥

अये अस्या हि वार्ता साम्प्रतं मे कुमुदामोदिन्या कथिता । एनामेवान्विच्छन्ती सेहान्यतो भ्राम्यति च । अहमेनामुपसरामि तावत् । (इति किञ्चिद् गत्वा) एषा मामासन्नमालोकयन्त्यप्यव्यग्रा तिष्ठति । एतत्तु भद्रोदर्कं मन्ये । यतः —

मुग्धा योषित् कामिनि कलिका भ्रमरे च संघटिते ।
अव्यग्रा तिष्ठेचेत् पुष्येदामोदमायत्याम् ॥११४॥

एनया सह कुशलप्रश्नपूर्वं मनाक् सल्लापं कर्तुमारभे तावत् । (आकाशे) भद्रे चन्द्रिके चिराद् दृष्टासि । अपि कुशलं ते । किं ब्रवीषि । कुशलमिति । अपि कुशलं तव अम्बायाश्चन्द्रलेखायाः । किं ब्रवीषि कुशलमेवेति । पुनरपि किञ्चिन्मे प्रष्टव्यमस्ति । तत् तवानुमतिमनुपलभ्य न पृच्छामि च । किं ब्रवीषि । पृच्छयतामिति । अपि कुशलं तस्य ते

---

१. ‘पक्ति’ ख.

प्रियस्य । किं ब्रवीषि । को मे प्रिय इति । द्विजिह्व इति श्रूयते । किं ब्रवीषि । शान्तं शान्तं पापमिति । स तादृशं किं तवापकृतवान् यतस्त्वमेवं विप्रलपसि । किं ब्रवीषि । तस्य वार्तायाः प्रसङ्गेनालमिति । तव तस्मिन् प्रेमा नास्ति चेत् कुतः पुनस्तस्य दुरीहितानि निगूहसि । किं ब्रवीषि । सुकुमारवस्तुप्रियो जन ईदृशेषु वैरस्यं प्राप्नुयादित्यस्मादिति, नास्त्येवं नियमः । किं न पश्यसि—

प्रीयतेऽलं सुधास्वाद्वयां चन्द्रिकायां चकोरकः ।
क्ष्वेलतीव्रे द्विजिह्वे नो वैरस्यमुपयाति च ॥११५॥

किं ब्रवीषि । श्रूयतां तावत् । दुरात्मा स द्विजिह्वः,

पथि पथि विजने मां बालिकां सञ्चरन्तीं
ग्रह इव रतिलीलालिप्सया द्रागुपेत्य ।
विहितगतिनिरोधं गाढमङ्केऽभियुञ्जन्
मुहुरकुरुत यद्यत् तत्तदत्रालमुक्त्वा ॥११६॥

कदाचित् पुनर्मम निकेतनमागतः तत्क्षण एव अपवरककोणे निगूढं निलीनां मां प्रति स्वाभिमतलाभार्थं परिचारिकाभिर्बहुधा निर्बन्धितवानिति । ततस्ततः । किं ब्रवीषि । ततो निशीथे,

बलात् कवाटमुद्घाट्य प्रविष्टः शयनालयम् ।
पुरोवात इवासह्यो मां गाढमुपगूढवान् ॥११७॥

इति । ततस्ततः । किं ब्रवीषि । ततः परं तस्य दुश्चेष्टितं वक्तुं नाहं शक्नोमि ।

प्रभाते तु वधूलोको लक्षणस्य निरीक्षणात् ।
मामनारूढकैशोरामप्युदक्ययामतर्कयत ॥११८॥

इति । दिष्ट्या वर्धसे । किं ब्रवीषि । तदा प्रभृति पुनर्मे विजने संगच्छमानाः पुरुषास्तद्रूपा एवाभान्तीति । ही ही! महती ते कातरता । (स्वगतम्) धिग् जनो नेदं वेद ।

गाढोपगूढकरणादिनिपीडनेन
प्रौढैव योषिदुपयाति रतिं न बाला ।
निष्पेषणेन हरिचन्दनयष्टिरेव
पुष्णाति सौरभभरं न तु पुष्पमाला ॥११९॥

(आकाशे) किं ब्रवीषि । अत्र मे बिलम्बेनाम्बा कोपिष्यति । तद् गच्छाम्यहमिति । सुगात्रि! कलामात्रमपि चात्र स्थातुमर्हसि । किंचिन्मे प्रष्टव्यमस्ति । किं ब्रवीषि । पृच्छयतामिति । कलवाणि! ब्रूहि,

एवमेव किमेतत् त्वं यौवनं यापयिष्यसि ।
शासनं सुमनोहेतेराहोस्विदनुरोत्स्यसे ॥१२०॥

किं ब्रवीषि । अलमीदृशान्येव पृष्ट्वेति । मुग्धे! मामैवं यौवने मुधा नोपेक्षितव्यस्तृतीयः स पुरुषार्थः । पश्य,

देवादिकीटपर्यन्तान् देहिवर्गानिमान् विधिः ।
मिथो यस्योपभोगार्थं पुंस्त्रीरूपेण सृष्टवान् ॥१२१॥

किञ्च—

परानन्दैकसंदायि क्रियाकल्पस्य दर्पणम् ।
शास्त्रं यस्य जगन्मान्यो मुनिर्वात्स्यायनोऽतनोत् ॥१२२॥

किं ब्रवीषि । अवसरे सति भावस्य मुखात् तच्छास्त्रं श्रोतुमिच्छामि इति। प्रयोगान् परिहरन्त्यास्तव शास्त्रस्य श्रवणेन किं फलम् । किं ब्रवीषि । तानप्यनुष्ठातास्मीति । तदेव तावत् पूर्वमारभ्यताम् । किं ब्रवीषि । यथाह भाव इति । एवं चेद् मया कदा ते निशान्तमागन्तव्यम् । किं ब्रवीषि । येयमागमिनी यामिनी तस्यां अम्बायाश्चन्द्रलेखाया नियोगेन तत्र मधुतन्त्रो नाम मन्त्री भगवन्तं कमपि देवं पूजयति । तस्याः पूजायाः साधनानि कुसुमादीनि सर्वाणि नियमपरिशुद्ध्या मया स्वयमेव सम्पादनीयानि । आपरिसमाप्तेर्भजमानया तस्य अन्तिक एव स्थातव्यं च किल । तेन ततोऽपरस्यां तमस्विन्यां,

निश्शेषं प्रशमं गतेषु विशिखाप्रान्तप्रदीपेष्वहो
सम्प्राप्तास्वभिसारिकासु सहसा सङ्केतशालान्तरम् ।
संविष्टेषु च नागरेषु सुदृशां सम्भोगवासालये
शय्याधाम ममैक एव निभृतं भावः समागच्छतु ॥ १२३ ॥

इति । (स्वगतम्) मुग्धैषा ह्रिया पुंसङ्गमे जनावगमं न सोढुं शक्नोति । तद्यथोक्तमेवानुवर्तनीयम् । (आकाशे) एवमेव । किन्तु तादृशे काले तत्रानेकेषु धामसु तत्कथमनतिपरिचितेन मया[1] ज्ञेयम् । किं ब्रवीषि । अभिज्ञानाय तस्य द्वारे ... मालिकां कवाटकीले कलयिष्यामि । .... (स्वगतम्) अहो वतैष ममानुकू ... . त । अथवैतन्न विस्मयनीयम् ।

यस्य शक्त्या महेशोऽपि ब्रह्मचर्यं समत्यजत् ।
आवेशात् तस्य कामस्य को जनो नैति विक्रियाम् ॥ १२४ ॥

(आकाशे) किं ब्रवीषि । समयातिक्रमो मां भृशं सम्भ्रमयति । तदनुमन्तु-

---

१. 'या विज्ञेयं' ख.

मर्हति भावो मां गमनायेति । अनुमतास्यचिरेण पुनः समागमाय । (पुरस्तादालोक्य स्वगतम्)

हन्तेयं मे हृदयं करिणी सरसोऽरविन्दमिव ।
प्रक्षोभ्यालं हृत्वा पृथुलनितम्बा प्रयाति सविलासम् ॥ १२५ ॥

(पुनरुद्ग्रीवमालोक्य) कष्टं दृष्टिपथादपि निवृत्ता । (समन्तत आलोक्य) हन्तैषा पुष्पवाटिका साम्प्रतमरण्यमिव प्रतिभाति । त्वरितमतो गच्छामि । (इति परि ... ां दिशि किंचिद् ... ...) ... गगनवर्त्मनि वर्तते असौ भगवान् भानुमान् । सम्प्रति हि,

वीथीष्वायतपर्यन्ततरुच्छायासु पांसवः ।
यान्ति साम्यं रमण्यङ्गस्रस्तचन्दनरेणुभिः ॥ १२६ ॥

अतः परं तु राजवीथीमाश्रित्य गच्छामि । (इति पदान्तरं गत्वा परिक्रम्यालोक्य च) अये अयं महाराजस्य अभिरामवर्मणः पारिपार्श्विको विश्वसेनः ।

आहूय नागरानुच्चैराचक्षाणस्ततस्ततः ।
आयात्यसिधरस्तस्य निदेशो मूर्तिमानिव ॥ १२७ ॥

कथमेष द्रुतमासन्नः सम्भूतः । एवं तावदेनमाभाषे । (आकाशे) सखे विश्वसेन! किमर्थं त्वमेवं धावसि । किं ब्रवीषि । नागरैर्नरपतिमार्गे मङ्गलोपचारान् कारयितुमिति । कस्मादयमारम्भः साम्प्रतम् । किं ब्रवीषि । महापाण्ड्यो नाम मधुरेश्वरो राजेहागत्य बाह्योद्याने वर्तते । स महाराजेनाभ्युद्गम्याभिपूज्यान्तर्नगरमानेतव्यस्तस्मादिति । अनागतपूर्वः स राजा किमर्थमिदानीमिहागतवान् । किं ब्रवीषि । श्रूयतां तावत्—

तस्यास्ति पाण्ड्याधिपतेस्तनूजा
कन्या सती कामवतीति नाम ।
निश्शेषयोषाकुलमौलिमाला
मूर्तेव साक्षान्नरलोकलक्ष्मीः ॥ १२८ ॥

यस्या गुणौघस्य समीक्षणेन
संजातयापत्रपया किलोर्व्याम् ।
तिरस्करिण्या पिहितस्वरूपाः
सुराङ्गना गूढतरं चरन्ति ॥ १२९ ॥

किञ्च, यस्तामुद्वहेत चतुस्सिन्धुमध्यवर्ति निश्शेषभूमण्डलं तस्य आज्ञावशंवदं किल भवेदिति । एतन्मया पूर्वमेव श्रुतम् । अतः परं पुनः कथय । किं ब्रवीषि । तां लोकैकसुन्दरीं चोलकर्णाटादिभूपाः तं राजानं पृथक् पृथगभ्येत्य सनिर्बन्धमभ्यर्थितवन्तः । स पुनर्दिने दिने गृहागतैर्गीयमानानि महाराजस्य अपदानानि पुलकिताङ्गं मुहुराकर्णयन्तीं तां महाराजे बद्धभावां विजानंस्तान् सर्वान् प्रत्याचष्टेवेति । ततस्ततः । किं ब्रवीषि । ततस्ते कुपिताः सम्भूय अक्षौहिणीभिः पाण्ड्यमण्डलं परितो निरुद्ध्य निश्शेषं भङ्क्तुं आरभन्तेति । ततस्ततः । किं ब्रवीषि । ततो महाराजस्य सेनापतिना महितवर्मणा ससैन्येन पारसीकान् निर्जित्यागच्छता पथि पथिकेभ्य इमां वार्तां श्रुत्वा सत्वरमागत्य युद्ध्यमानेन ते सर्वे पराजिताः पलायिताश्चेति । ततस्ततः । किं ब्रवीषि । ततस्स राजा तत् कन्यारत्नं महाराजाय दास्यन् तेन सेनापतिना साकमिहागतो वर्तत इति । चन्द्रप्रभाप्रभृत्यवरोधवधूप्रेमपरतन्त्रस्य महाराजस्य तस्यां किमस्ति वाञ्छा । किं ब्रवीषि ।

---

१. 'रिण्या' ख. २. 'स्य तस्य तस्यां' ख.

श्रूयतां तावत् । कदाचिन्मथुरापुर्यां ... तः[1] कोऽपि चित्रकारो भगवतः स ... रेश्वरस्य ... ... स्याकलये अयं स महाराजो हाटकमयीं शिबिकामारूढो महामात्येन बृहद्वसुना साकं महत्या सेनया वृतो बाह्योद्यानं गन्तुमागच्छति । अहो बत !

असन्नृपालसंघातादवनीमवितुं चिरम् ।
अयं दैत्यान्तकः साक्षादवतीर्ण इह ध्रुवम् ॥ १३० ॥

कथमेष द्रुतमासन्नः सम्भूतः । सत्वरं मार्गात् किञ्चिदपसृत्य स्थित्वा बद्धाञ्जलिरेवमेतस्मै श्लाघे तावत् । (इति पदान्तरे स्थित्वा आकाशे) जय जय महाराज केरळाधीश्वर ! जय ।

वीराग्रेसर ! लोकेऽस्मिन् प्रतापे ते प्रसर्पति ।
चित्रं शिशिरकालेऽपि प्रजाः शीतं न बाधते ॥ १३१ ॥

अपिच,

अम्भोधिर्धवलीकृतत्रिजगता कीर्तिप्रतानेन ते
भ्रान्तात्मा सकला नदीस्त्रिपथगानाम्नैव सम्बोधयन् ।
ताभिः प्रेमरुषा (ततो) जलरुहैर्दत्तान् प्रहारान् मुहु-
र्विन्दन् नन्दति कस्य वा त्वदुदयो न श्रेयसे जायते ॥१३२॥

(स्वगतम्) एष महाराजो मम श्लाघां शृण्वन् हस्तसंज्ञया शिबिकागतिं निवार्य (नय)नेन मां मानयितुमारभते । (आकाशे) किं (महा)राजः पृच्छति । सखे अभिराम ! अपि कुशलं तवेति । कुशलमेव । किं महाराज आज्ञापयति । कोऽप्यर्थो मे त्वया साधयितव्योऽस्ति ।

---

१. 'तः सुरेश्व' ख.

वदद्यैव वा श्वो वा निशामुखे मे सन्निधावागन्तव्यमिति । एवं तावत् । (स्वगतम्) अयं महाराजः सपरिवारो गच्छति । अहमपीतो गच्छामि । (इति परिक्रम्य पार्श्वत आलोक्य च) अये ! इदं कल्याणोदं नाम केळीसरः । अहो बतास्मिन्,

नीलाम्बुजवने लीला[1] लीनेयमळिमण्डली ।
ज्ञायते मारचा[2](पज्या)टङ्कारमधुरैः स्वरैः ॥ १३३ ॥

किञ्च,

इ(यम)त्राम्बुजारण्यं प्रविष्टा हंससंहतिः ।
(प्रमत्त)प्रमदायात्रासगोत्रैरवगम्यते ॥१३४॥

(पदान्तरे आलोक्य)

एषा काचित् सुतनुरवतीर्यागलान्ताञ्जलान्तः
प्रक्षाल्याङ्गान्यथ मणितटे न्यस्तपूर्वं स्ववासः ।
अर्धोत्तीर्णा सितसरसिजैर्बिम्बितैर्विप्रलब्धा
पीन(श्रो)णी परिमृगयते पाणिनोत्सारितेन ॥१३५॥

मुग्धाचाराया एतस्याः सन्निधिं किंचिद् वक्रया गत्या परिहृत्यानेन कूलमार्गेणैव गच्छामि । (इति परिक्रम्य पार्श्वत आलोक्य च) इयं गणिकाकुलपताका स्नातोत्तीर्णा सलिलार्द्रं केशपाशं विमलमृदुलेन चेलेन परिमार्जयन्ती तिष्ठति । . . . .

. . . .
. . . . सलिलकणिकाश्रेणिभिस्तद्विलासम् ।

---

१. 'ळ ली . . . यमळि ' ख.

२. 'चा . . . टङ्कार ' क. ख.

किञ्चार्द्रत्वात्तनुनिवसने गाढमङ्गेषु लीने
व्यक्तिं प्रायो व्रजति विपुलश्रीरयं श्रोणिबिम्बः ॥१३६॥

... ...(जा)नामि । (इति किञ्चिद्गत्वा) एषा मां दृष्टवत्यपि नैत्राभिमुखी भवति । तथापि कुशलप्रश्नादिकं करोमि । (आकाशे) भद्रे कलापताके ! अपि कुशलं ते । किं ब्रवीषि । अलमत्रेदानीं भावो मां कुशलं पृष्ट्वा ।

यश्चत्वरान्तवीथ्यैव प्रत्यहं प्रचरन् मुहुः ।
तीव्रातपादिबाधेऽपि न विश्राम्यति मे गृहे ॥ १३७ ॥

इति । तन्वि ! मन्युना अलम् । मम तत्तत्कृत्यपारतन्त्र्यमेवात्रापराध्यति । किं ब्रवीषि । नहि नहि मम भाग्यविपर्यय एवेति । मामैवम् । श्वो वा परश्वो वा अहं ते निशान्तं आगन्तास्मि । किं ब्रवीषि । एवं चेत् सांप्रतं गम्यताम् । अचिरेण पुनर्दर्शनमस्त्विति । (स्वगतम्) साधयिष्यामि तावत् । (इति परिक्रम्य आलोक्य च) अये ! इदं तद् दृश्यते महावसुमन्दिरम् । सत्वरमुपेत्यात्र प्रविशामि । (इति किञ्चिद् गत्वा प्रवेशं नाटयित्वा आलोक्य च) अहो वर्तेतस्मिन्,

शाला लसन्ति दिङ्मुखविसरत्कनकच्छदीरुचो बह्वयः ।
सौधाश्च व्योमनदीकूलङ्कषशृङ्गकोटयोऽसंख्याः ॥१३८॥

नेत्रानन्दकरमत्रत्यमिमं लक्ष्मीविलासं पश्यन्ननया प्रतोल्या गच्छामि । (इति परिक्रम्यालोक्य च) इयं केसरमालिकायाः सखी कुरङ्गिका निजकुचप्रमाणौ कुम्भौ कराभ्यां बिभ्रती मार्गान्तरेण ससंभ्रमं गच्छति । उपसरामि तूर्णमेनाम् । (इति किञ्चिद्गत्वा) एषा समीपमागतमपि मां अन्यचित्ततया न पश्यति । तदेवमेनामाभाषे । (आकाशे) भद्रे कुरङ्गिके ! कटाक्षमात्रेणाप्येतं जनमसंभाव्य किं त्वं गच्छसि । किं ब्रवीषि ।

नमो भावाय । क्षन्तव्योऽयमभूतपूर्वः परिचारिकाजनस्य प्रमादापराधो भावेनेति । आस्तामेतत् । आख्याहि किमर्थमेवं[1] गच्छसि । किं ब्रवीषि । हिमनीरमानेतुमिति । कस्मादिदानीमयमारम्भः । किं ब्रवीषि । श्रूयतां तावत्—

केनापि हेतुनास्माकं सखी केसरमालिका ।
सन्तापेनाग्निकल्पेन सततं परिभूयते ॥ १३९ ॥

तेन पुनः,

अङ्गानां स्पर्शने तस्या वस्त्रादिप्लोषशङ्कया ।
उक्षणं हिमनीरेण सख्यः कुर्वन्त्यनुक्षणम् ॥ १४० ॥

ततस्तस्य निकेतने वर्तमानाः सर्वे हिमनीरकुम्भाः प्रायोऽधुना रिक्ता भवन्तीत्येतस्मादिति । गच्छ तावत् त्वं सत्वरम् । किं ब्रवीषि । यथाह भाव इति । (स्वगतम्) गतेयम् । अहमपीतो गच्छामि (इति परिक्रम्य चिन्तां नाटयित्वा) ह्री ! महत्तरं दुःखमनुभवति तपस्विनी केसरमालिका । अतः परं पुनस्तस्या भ्रमरकेण संयोजनं मनागपि न कालातिक्रमक्षमम् । तदस्मिन् कर्मणि मे साहाय्यमाचरन्ती वत्सा हेममालिका कुत्र वर्तत इति कथं जानामि । (इति पुरस्तादालोक्य) इयं वत्सा हेममालिका दूरादेव ममालोकनादितः सत्वरमागच्छति । अस्याः खलु,

आमोदशेषकुसुमोज्ज्वलकेशवेशो
मूर्धायमात्तविनयं विनतिं समेति ।
तस्मिन्निदं करयुगं ललितं निबद्धं
रक्ताब्जकुड्मलवतंसरुचिं दधाति ॥ १४१ ॥

---

१. 'र्थं त्वमेवं' ख.

किञ्चैषाभ्युपेत्य हेममालिका अहमाभिवन्द इति पादयोर्मामभिवन्दते । आशीर्वचनं तावत् प्रयुञ्जे । (आकाशे) वत्से! भद्रं ते भूयात् । किं ब्रवीषि । अनुगृहीतास्म्यार्यपादैरिति । अपि कुशलं ते । किं ब्रवीषि । मम कुशलमेव । किं तेन । केसरमालिका तु साम्प्रतं,

निरस्य नीहारनिरोधमन्तर्गृहं प्रविष्टेन सरोनिलेन ।
पयोरुहामोदवहेन मन्दं स्पृष्टा सपद्येव विमूर्च्छिताभूत् ॥१४२॥

इति । अलमुद्वेगेन । तथैवं संक्रीडमानो भगवान् मनोभव एव तां प्रकृतौ वर्तयिष्यति । श्रूयतां पुनरियदस्तीदानीं करणीयम् । किं ब्रवीषि । अवहितास्मीति । केसरमालिका यावन्मया नियुक्ता महावसोरन्तिकमुपेत्य तस्य सत्कृतिमुपलभमाना तत्र तिष्ठेत् त्वया तावदुपगम्य तदालोकनेन कलहायमानया द्रुतं निर्गन्तव्यम् । किं ब्रवीषि । यदनुशासत्यार्यपादा इति । सा पुनरत्र कुत्र वर्तते । किं ब्रवीषि । यदिदमिह दक्षिणतश्चित्रोज्ज्वलभित्तिकं दृश्यते वेश्म तस्मिन्निति । गच्छ तावत् त्वम् । अहं पुनरितो गच्छामि । (इति परिक्रम्य आलोक्य च स्वगतम्) एतत्तत् केसरमालिकाया निवासवेश्म । प्रविशाम्येनत् । (इति प्रवेशं नाटयित्वा आलोक्य च) इयं सा केसरमालिका या मोहेन विहीना ग्रहेण विमुक्ता सुधांशुमूर्तिरिव विलसन्ती पश्चाद्भागे निषीदन्त्या सख्या चित्राङ्गदया पीनस्तनभरितेन वक्षसा गाढावलम्ब्यमानापराङ्गा शय्यातले निषीदति । अहो बतातिसुन्दराण्यस्या अङ्गप्रत्यङ्गानि । तथाहि—

पद्मं पद्ममिवोल्लासि शशीव सुभगः शशी ।
अस्या वक्त्रमहो चित्रमस्या वक्त्रमिवोज्ज्वलम् ॥ १४३ ॥

अपि च,

एष विशेषो बिम्बादधरस्यास्या मृगीदृशो भवति ।
रागोऽस्ति तस्य पत्या किन्त्वेतस्य प्रकृत्यैव ॥ १४४ ॥

अन्यच्च,

नेमौ स्तनौ वक्षसि सुभ्रुवोऽस्याः
सौभाग्यसारस्य निधानकुम्भौ ।
नेयं ततोऽधोऽपि च रोमराजी
रज्जुस्तयोर्बन्धविमुक्तलम्बा ॥ १४५ ॥

किं बहुना,

एनां निर्दोषनिःशेषगुणोज्ज्वलतनूलताम् ।
विश्वरम्यार्थसारांशैर्विश्वकर्मा व्यधाद् ध्रुवम् ॥ १४६ ॥

उपसराम्येनाम् । (इति किञ्चिद्गत्वा) एषा ममालोकनेन शय्यातलात् तूर्णमवतीर्णा नमो भावायेति मह्यमञ्जलिं बध्नाति । आशिषा अभिनन्दाम्येनाम् । (आकाशे) भद्रे ! वाञ्छितार्थसिद्धिस्ते भूयात् । किं ब्रवीषि । अनुगृहीतास्मि भावेनेति । अपि कुशलं ते । किं ब्रवीषि । जीवन्त्या मे कुतः कुशलमिति । निर्वेदेनालम् । एषोऽहं त्वामचिरात् तेन प्रियतमेन भ्रमरकेण संयोजयितुमेवोत्सहे । किं ब्रवीषि । हन्त मन्दभाग्याया मम हेतोः भावोऽपि भृशं क्लिश्यत इति । मैवम् । मल्लिकां चम्पकेन सह बध्नतः कियान् क्लेशोऽस्ति । किं ब्रवीषि । कथं पुनर्मे तेन महानुभावेन संयोजनं भवत्विति । त्वं साम्प्रतमेव महावसोः समीपमुपेत्य तस्य सत्कारमुपलभमाना घटिकामात्रं तत्र तिष्ठ । ततोऽहमागत्योपायेन तस्यानुमत्यैव त्वां नयामि । किं ब्रवीषि । यथाह भावः । एषा अहं तावद् गच्छामीति । (स्वगतम्) गतेयं अहं पुनरस्याश्च हेममालिकायाश्च यथोक्तविधानस्यानन्तरमेव तत्र गन्तुमर्हामि ।

तेन मन्दमनुगच्छामि । (इति परिक्रम्य आलोक्य च) अये ! इयं सा महावसोः स्वच्छन्दावासरत्नशाला । उपसराम्येनाम् । (इति किंचिद्गत्वाऽऽलोक्य च)

अहो बतातिरम्यैषा वासतेयी विभासते ।
कुबेरसद्मनः साक्षात् प्रतिमेव प्रकल्पिता ॥ १४७ ॥

(पार्श्वत आलोक्य) अये अत्र गृहकृत्यानि निपुणं कुर्वन्त्येताः परिचारिकाः । तथाहि एषा काचित्—

विलोलकबरीपतत्कुसुमजाललोभभ्रमद्-
द्विरेफनिकराकुला कलशरज्जुकर्षक्रमात् ।
स्खनत्कनककङ्कणं विनमदुन्नमद्दोर्लता
जनस्य मनसा समं हरति कूपिकायाः पयः ॥१४८॥

अपिच,

काप्यन्यैषा कुञ्चितोज्ज्ञानुपादं
स्थित्वा बन्धोन्मुक्तधम्मिल्लभारा ।
प्रस्विन्नास्या नृत्यदुन्नाम्युरोजा
प्रेङ्खच्छ्रोणी ग्राव्णि गन्धं पिनष्टि ॥१४९॥

किंच,

अन्येयं तण्डुलव्रातं श्यामितं स्वेक्षणश्रिया ।
स्फटिकोलूखले मुग्धा मुहुः शोधयति भ्रमात् ॥ १५० ॥

अहो बत !

अस्याः पाणिर्मुखरवलयश्रेणिरत्रैक एव
प्रायेणोच्चैर्भ्रमति मुसलक्षेपणावर्तनेन ।
अन्यो धन्यः कनकरशनां स्रंसने स्रंसने द्राक्
प्रत्याबध्नन् पृथुनि जघने क्रीडति स्वैरचारी ॥१५१॥

अलमत्रातिविलम्बेन । प्रविशामीहान्तः, । (इति प्रवेशं नाटयित्वा आलोक्य च) अयं महावसुः प्रतिपत्तिमूढ इव विषण्णवदन आस्ते । इयं केसरमालिका अस्य समीपे तिष्ठति च । तद्वत्सया हेममालिकया यथोक्तमत्र विहितमेवेति च मन्ये । उपसरामि तूर्णमेनम् । (इति किंचिद् गत्वा) अये ! एष ममालोकनेन सत्वरं प्रत्युत्थाय सखे ! चिराद् दृष्टोऽसि । एहि परिष्वजे त्वामिति बाहू प्रसारयति । प्रतिनन्दाम्येतत् । (इति तथा नाटयित्वा आकाशे) किं पृच्छति भवान् । अपि कुशलं त इति । कुशलमेव । किं ब्रवीति भवान् । मम भागधेयेनैव साम्प्रतमत्रानीतोऽसि । मत्कृते महत्तरं किमपि कार्यं सत्वरं कर्तुमर्हतीति । अये अतर्कितसम्भूतोऽयं मयि प्रसादो भवतः । किं ब्रवीति भवान् । तवान्तेवासिनी हेममालिका सम्प्रत्येतस्याः केसरमालिकाया दर्शनेन कलहायमाना द्रुतं निर्गता । सा त्वया तूर्णमनुगम्यानुनीयानेतव्येति । एवं तावदेषोऽहं गत्वा तत्तथा सद्यः साधयित्वा प्रत्यागमिष्यामि । (इति परिक्रम्य) मारिष ! मया अनुगम्य भृशमनुनीतापि सा नागच्छति । किन्तु केसरमालिका तूर्णमतः प्रव्रजेच्चेदहमागच्छेयम् । नो चेत् गामिष्याम्येवेति वदन्ती मार्गे तिष्ठति । किं ब्रवीति भवान् । सखे ! ब्रूहि किमत्र मयेदानीं करणीयमिति । एनां सत्वरं प्रव्रज्यायै विसृज्य भवान् स्वयमेव गत्वा तां सादरं अनुनीयानेतुमर्हति । किं ब्रवीति भवान् । एवमेव । किन्तु मया सर्वजनविदितमानीतां कुलजामेनामे-

काकिनीमेव कथं विसृजामीति । अतो विषादेनालम् । अहं भवन्नि-देशादेनां स्वगृहं नेष्यामि । किं ब्रवीति भवान् । साध्वेतद् एवमेव भवतु । एषोऽहं तां हेममालिकामानेतुं त्वरितं गच्छामीति । (पार्श्वत आलोक्य) भद्रे केसरमालिके ! अय महावसुः ससंभ्रमं गच्छति । त्वं द्रुतमनुगम्यैनमापृच्छस्व । किं ब्रवीषि । अलमापृच्छनेनानुमतमेवैनेन मे गमनमिति । गच्छावस्तावत् सत्वरम् । (इति परिक्रम्य पश्चादालोक्य च स्वगतम्) अहो बतैषा प्रहर्षोदयेन साम्प्रतमन्यैव प्रतिभाति ।

विप्रलम्भेन सोत्कण्ठं सीदन्तीनां (मृगी)दशाम् ।
प्रेयसः सद्मने यात्रा प्रायशः सङ्गतेः समा ॥ १५२ ॥

(आकाशे) भद्रे ! दिष्ट्या त्वमद्य जलकामिग्रहान्मुक्तासि । किं ब्रवीषि । अनुकम्पाविलासोऽयं भावस्यैति । तूर्णं गच्छावः । (इति भूयोऽपि परिक्रम्य कर्णं दत्त्वा च) अये ! इह महानटायतने मृदङ्गनादः श्रूयते । तेन तत्र नाट्यं प्रवर्तत इति मन्ये । किं ब्रवीषि । अथ किमिति । तत्र गत्वा प्रेक्षितुमिच्छामि । किं ब्रवीषि । यथेच्छति भाव इति । तत्र तावद् गच्छावः । (इति परिक्रम्य) एतत्तन्महानटायतनम् प्रविशावोऽत्र । (इति प्रवेशं नाटयित्वा) प्रेक्षावहे तावदेनन्नाट्यम् । (इति पुरस्तादालोक्य) अये । अतिरमणीयमिदं किमपि पात्रं रङ्गे भृशं लसति । किं ब्रवीषि ! अथ किमिति । ...

कबरी नीरदश्यामा लाक्षाशोणौ रदच्छदौ ।
... ... क्षो ... दहलिकोज्ज्वला ॥ १५३ ॥

अत ... ... माणाधि ... यं स्त्रीवेषधरः पुरुषः ... प्रतिभाति । किं

ब्रवीषि । अथ किमिति । शृणुवस्तावदस्य पाठ्यम् । (इति कर्णं दत्त्वा) कथमयं पठति—

नेत्राम्बुस्नपिताम्बरे परिजनस्योत्सङ्गभागे शिरः
सन्तापग्लपितेऽब्जिनीदलघटातल्पेऽधराङ्गं ततः ।
सा यस्यां नयनामृतं प्रियतमा तस्यां दिशि प्रेक्षणं
जीवोऽश्रुप्रतिरुद्धवर्त्मनि गले तस्याधुना वर्तते ॥१५४॥

किं ब्रवीषि । अये रससान्द्रमेतच्चेतसो भृशमुत्कण्ठाकरं भवतीति । अभिनयमस्य मनाक् प्रेक्षावहे । (इत्यालोक्य) अहो बतायम् ,

चतुरैश्चेष्टितैस्तांस्तान् रम्यान् भावान् पृथक् पृथक् ।
मूर्तानिव यथौचित्यं प्रकाशयति निर्भरम् ॥ १५५ ॥

किं ब्रवीषि । अलमस्य पाठ्यस्य श्रवणेन अभिनयस्य प्रेक्षणेन च स्वल्पावशेषोऽयं वासरः । तत् सत्वरमतो गच्छाव इति । सम्यगात्थ । सत्वरं गच्छावस्तावत् । (इति परिक्रम्य पुरस्तदालोक्य च) भद्रे ! इदं तत्ते प्रियतमस्य भ्रमरकस्य निकेतनं दृश्यते । तूर्णमेनदुपसरावः । (इति किञ्चिद्गत्वा पुरस्तदालोक्य च) तन्वि! पश्य[1] दिष्ट्या अयं तव प्राणवल्लभो मलयमारुतापातशीतले बाह्यालिन्ददेशे शेते । किं ब्रवीषि । हन्त अतिदीनो भवत्ययं महानुभाव इति । तथापि सम्पूर्णैवास्य लावण्यलक्ष्मीः । पश्य—

इक्षुकाण्डं करे वामे दक्षिणे कुसुमानि च ।
अयं दधीत चेल्लोका मन्येरन्नेनमङ्गजम् ॥ १५६ ॥

---

१. 'सम्पूर्णेव' ख.

किं ब्रवीषि । अथ किमिति । अत्र तावदेतेन कस्तूरीमृगपञ्जरेणान्तरितौ स्थित्वास्य दशाविशेषमालापश्रवणादिना जानीवः । (इति पदान्तरे स्थित्वा कर्णं दत्त्वा च) कथमयमालपति—

मम चित्तमिदं विधाय लक्ष्यं
शरयोग्यं कुरुते ध्रुवं मनोभूः ।
प्रतिवासरमस्य निष्ठुरायां
प्रहृतौ कौशलमेतदेधते यत् ॥१५७॥

तदत्र किं मया करणीयमिति । किं ब्रवीषि । कष्टं कठोरोऽयं मारः इति । (कर्णं दत्त्वा) पुनरपि कथमालपति– सखे सरसकाञ्चनादिद्रवालिखितकेसरमालिकासनाथं तच्चित्रफलकम् अपवरकान्तरकात् तूर्णमानय । चित्ररूपां तां जीवितवल्लभां नयनाभ्यामनुभवन्नेतज्जीवितं धारयितुमिच्छामीति । किं ब्रवीषि । भाव! किमतःपरं श्रोतव्यमस्ति । सत्वरमुपसराव इति । सुगात्रि! कलामात्रमप्यत्र धैर्यमालम्ब्य स्थीयताम् । किं ब्रवीषि यदनुशास्ति भाव इति । पश्यायं सारसः एवं तावदिति स्वोत्सङ्गादस्य मूर्धानमुपधाने निधाय सत्वरमपवरकं प्रविशति । किं ब्रवीषि । हन्तायमेकाकी सम्भूत इति (कर्णं दत्त्वा) कथमयं विलपति—

अयि जीवादपि प्रेष्ठे भद्रे केसरमालिके! ।
कदाहं त्वाम् ॥ १५८ ॥

इति । किं ब्रवीषि । कुतो वाक्यशेषस्य उक्तौ बिलम्बते इति । (सम्यगालोक्य) कष्टम् मूर्च्छितोऽयं तपस्वी । किं ब्रवीषि । भाव किं मया अत्र कर्तव्यमिति । सत्वरमुपसृत्य गाढमङ्गैरेनमङ्गेषु संस्पृश्य संज्ञां प्रापय । किं ब्रवीषि । ही कष्टम् । नाहं तथा तत्कर्तुं शक्नोमि । यतो

बाष्पायेते ममैते नेत्रे । प्रस्खलतश्चैतौ पादाविति । अहमेव तावत् त्वां करे गृहीत्वा नीत्वा सत्वरमेनेन संयोजयामि । (इति तथा नाटयित्वा आलोक्य च स्वगतम्) अहो एष सद्यः संज्ञां संप्राप्तवान् । किञ्च,

अद्रवैषा सुधा केन मम गात्रे समर्पिता ।

इति (नेत्र उन्मील्य) दिष्ट्यैषा मे बहिश्चारी जीवः केसरमालिका । (इति मुर्धानमुन्नमय्य आलोक्य च) कथमेष प्रियसखोऽभिरामश्च । (इति प्रेयस्या अङ्गलतामवलम्बमान एवोत्थाय शयनीये निषीदति । आकाशे) । किं ब्रवीषि । अङ्ग प्रियसख ! अभिराम ! स्वागतं ते । कुतस्त्वमेवमिदानीम् इति । महावसुमन्दिरात् । किं ब्रवीषि । अपि कुशलं त इति । कुशलमेव । (पार्श्वत आलोक्य स्वगतम्) अयं सारसः चित्रफलकमादाय सत्वरमागतः (कर्णं दत्त्वा) एष भ्रमरकः कथमेनं वदति । सखे सारस !—

आलेख्यप्रेयसीमेनामलमालोक्य साम्प्रतम् ।
प्रत्यक्षं वर्तमानायां देवतायां किमर्चया ॥ १५९ ॥

तदेनं चित्रफलकं पूर्वस्थानमेव प्रापय इति । अयं सारसः एवं तावदित्यपवरकमेव प्रविशति । (पुरस्तादालोक्य) एष भ्रमरकः पुनः अयि प्रेयसि ! स्वागतं ते । दिष्ट्या त्वमिदानीं दृष्टासि इत्यादीनि वदन् पुलकितैरङ्गैः पुलकितेष्वङ्गेष्वेनां परामृशन् सादरं सभाजयति । एवं तावदभिनन्दाम्येनम् । (आकाशे) अङ्ग प्रियसख ! दिष्ट्या त्वमिष्टार्थसिद्ध्या वर्धसे । किं ब्रवीषि । अङ्ग ! महोपकारिन् ! एतत्ते मयि स्नेहस्य विलसितम् । एहि आलिङ्गानि त्वाम् । आस्स्वैतस्मिन् शयनीय एव । कथय कथमियम् आनीता त्वया मे सञ्जीवनौषधिरिति । तत्सर्वं श्वः प्रभाते भवतु । पश्य पश्चिमायां दिशि —

अतिरोहितरोचिरर्यमासा-
वपराद्रावयते तिरोहितत्वम् ।
नलिनीदशया दशां निमेषो
नचिरात् स्यादिति बोधयन् नृलोकम् ॥ १६० ॥

सम्प्रति हि—

श्वासैर्मल्लीमारुतान् वारयन्त्यो
दृष्टी सास्रं प्रेरयन्त्यश्च मार्गे ।
आलम्ब्यालीमासते वासतेर्यां
द्वारि प्रायो योषितः प्रोषितानाम् ॥ १६१ ॥

तेन प्रेयस्या मालिन्याः साम्प्रतन्तनीं दशां संस्मरदेतदुद्विजते मे चेतः । ततोऽहं साम्प्रतं स्वनिकेतनं यातुमुद्यतोऽस्मि । किं ब्रवीषि । यथा ते रोचत इति । केसरमालिके कथं त्वं मन्यसे । (स्वगतम्) एषा प्रियतमाङ्गस्पर्शसमुदितपरमानन्दमग्नमना न मे वचः शृणोति । तदलमत्र निर्बन्धेन* ॥

इतः परं कपाठे '[प्रहर्षमभिनीय] एष सुस' इति, ख पाठे [प्रहर्षमभिनीय] एषः सुसन्नसुखं व्यपास्य . . . . . दुरशीलदुःखैः क्षताशि, क्षपोषणधारणादिभि . . . . . . त्वा समापूपरत्' इति च दृश्यते ।

श्लोकानुक्रमणी

श्लोक.	पुटम्	श्लोकः	पुटम्
अङ्गानां स्पर्शने	४५	अस्या दृशो	१९
अतिरोहित	३	अस्य वक्षोज	,,
अधुनेष्टार्थ	,,	अहो बतातिरम्य	४८
अन्तस्तदादि	१२	अहो विचित्र	२३
अन्धकारकुल	३	अहो सुराङ्गना	१८
अन्येयं तण्डुल	४८	आमोदशेष	४५
अभिवाञ्छा	२४	आरुण्यं जनयत्ययं	९
अभिवृत्तिपरा	२१	आर्यपादैर्यदा	५
अम्भोधिर्धवळी	४२	आळीमुखेषु	,,
अयं नीरन्ध्र	२८	आलेख्यप्रेयसी	५३
अयं पुंस्कोकिल	३३	आस्कन्धान्त	२९
अयं मामत्र	३१	आहूय नागरानुच्चै	४०
अयमारभते	२४	इन्दुकलां हर्तुं	१
अयि जीवादपि	५२	इन्दुर्दुमार्ग	७
अयि मधुकर	२१	इमामद्य	२५
अर्कोऽसावति	३	इमौ कावप्यहो	३२
असन्नृपालसङ्घात	४२	इयमत्राम्बुज	४३
असितकमल	३०	इष्टस्य पुंसो	११
अस्त्येतेषां	१७	ईदृक् सौभाग्य	३
अस्याः कण्ठच्छव्याः	३६	ईदृश्यामप्यवस्थायां	११
अस्याः पाणिर्मुखर	४९	उदेति तापो	२४
अस्याः प्रवालच्छवि	२०	उद्यज्ज्वालं	२७
अस्याः सुचार्व्या	१९	उभयोर्गूढ	८

श्लोकः	पृष्ठम्	श्लोकः	पृष्ठम्
उरोनिबिड	२०	तस्यास्ति पाण्ड्य	४१
एतौ प्रसून	२९	तापिञ्छमुद्गुच्छ	२९
एनां निर्दोष	४७	ताम्बूलयोगं	१४
एवमेव किमेतत्	३८	दरावनत	३४
एष विशेषो	४७	दिष्ट्या प्रदक्षिणं	६
एषा काचित्	४३	देवादिकीट	३८
एषा कापि	१७	द्वारे बाह्ये	१६
एषा त्रस्तैण	२४	नखदशनपद	८
एषान्या गृहकुड्य	१७	निजप्रभामात्र	६
एषा मुखाम्बुज	२३	निरस्य नीहार	४६
एषा सा मल्लिका	४	निःशेषं प्रथमं	३९
कबरी नीरद	५०	नीलाम्बुजवने	४३
कस्माच्छ्रान्ता	३०	नेमौ स्तनौ	४७
काप्यन्यैषा	१७	पथि पथि विजने	३७
काप्यन्यैषा	४८	पद्मं पद्ममिव	४६
केनापि हेतुना	४५	परस्मिन् निर्भरं	११
किं स्वेच्छातो	१५	परानन्दैक	३८
किमत्रान्तः	१३	पलितश्वेत	२६
क्षरन्मरन्दं	२८	पश्येयुरस्याः	३६
गन्धेभगण्ड	३३	पुष्पलोभ	२९
गाढोपगूढ	३८	पुष्पाणां पातो	२५
गौणीवात	११	पूर्णा मे लोचन	१९
चित्रकारस्य	१७	पूर्वस्मिन्	२२
तत्र स्थाने	३४	प्रकटितपृथु	१५
तत्सौम्याङ्गी	,,	प्रत्यग्राम्बुद	२२

श्लोकः	पुटम्	श्लोकः	पुटम्
प्रभावे तु वधू	३७	युवानौ हे कोकौ	३२
प्रीयतेऽलं सुधा	,,	रत्नादर्शनिभे	१०
प्रेक्षारसपूर्ति	२	राज्यलक्ष्मीं	१२
बलात् कवाट	३७	लीलाशुकोऽयं	२१
बालातपो	३	लोकैकमोहिनी	३६
बिम्बलीवासिन	२	वल्लीवेश्मसु	२७
ब्रह्मा स्वकान्ता	२०	विद्यार्थिन्या	२६
भवतो दर्शनं	३२	विपञ्च्यां कश्चित्	,,
भ्रमरक इति	५	विप्रलम्भेन	५०
मदमन्थर	१४	वियोगिनां	२८
मधुरौज्ज्वल्य	२	विलोलकबरी	४८
मनो जनानां	७	वीथीषु विच्युत	७
मनोज्ञयास्या	२०	वीथीष्वायत	४०
मम चित्तमिदं	५२	वीराग्रेसर	४२
मिथो नितान्त	४	व्याख्या वात्स्यायनीय	२६
मुक्तकेशः	१३	व्याघ्रवेश्म	२
मुग्धा योषित्	३६	शय्यानिकेतनं	९
मुग्धा वध्वो	३	शाला लसन्ति	४४
मुग्धैषा प्रौढेव	२३	शिञ्जानकङ्कण	३०
मूर्तेनेव मनोजेन	९	शोभन्ते मणिदीप	६
मृगाक्षीणामङ्गं	१	शोषाय धान्य	१५
यत्पूर्वमाश्लेष	२७	श्रीमन् नन्दसुत	१
यश्चत्वरान्त	४४	श्वासैर्मल्ली	५४
यस्य शक्त्या	३९	सझङ्कार	२९
यस्या गुणौघस्य	४१	समुत्पन्ना	६

श्लोकः	पृष्ठम्	श्लोकः	पृष्ठम्
सूर्यचन्द्राविमौ	३५	स्मरसि तदयि	३३
सेयं निशीथिनी	९	स्वर्गात् किन्त्वमर	७
स्त्रीणां सदैव	२८	हन्तासावादित्यो	२७
स्त्रीणामीदृश्यवस्था	९	हन्तेयं मे	४०
स्त्रीपुंसानां	१२		